This is a reproduction of a library book that was digitized by Google as part of an ongoing effort to preserve the information in books and make it universally accessible.

Google™ books

https://books.google.com



ЭЛИ Nalorakkuana Sandiana
TL
805

Digitized by Google

IndL 3305.9



Harvard College
Library

THE BEQUEST OF

Charles R. Lanman

PROFESSOR OF SANSKRIT
1880–1926

Digitized by Google

IndL 3305.9

DEC 24 1906

CHARLES E. NORTON
9 FARRAR ST.,
CAMBRIDGE, - MASS.

Ancient Classics for Sanskrit Readers.

No. II.

NALOPAKHYANA SANGRAHA

BY

LAKSHMANA SURI

AND

BALAKANDA OF RAMAYANA SARA.

TANJORE.

THE POORNACHANDRODAYA PRESS.

Price—Five annas] **[Postage Extra.**

1905.

Copyright Registered.

Digitized by Google

...LEGE LIBRARY
...ESTATE OF
...WELL LANMAN
...AUG. 15, 1941

Digitized by Google

bdL 3 3 5 · 9

॥ नलोपाख्यानसंग्रहः ॥

यत्प्रसादेन वचसां प्रसादादिगुणोदयः ।
साधिर्भवतु वाग्देवी मायै वाचा प्रसन्नया ॥

आसीन्निषधेषु नलो नाम राजा। स हि साङ्गेषु वेदेषु धनुर्वेदे पारं गतोऽश्वेषु कुशलो गुणैः संपूर्णश्च बभूव । तदा विदर्भराजस्य भीमस्य दमयन्ती नाम कन्यारत्नमजायत । सा खलु रूपेण लोकेऽतीया बभूव । क्रमेण यौवनवती सा समीपेऽसकृत्कीर्त्यमानान्नलस्य गानाकर्ण्य तस्मिन्मनो बबन्ध । तथैव नलोऽपि दमयन्त्या रूपं ः पुनर्जनैः कुतूहलेन वर्ण्यमानं श्रुत्वा तस्यामनुरागं चक्रे । एवं ा शृण्वतोरेव तयोरदृष्टः कामो व्यवर्धत । नलस्तु तं कामं मनसा यितुमशक्नुवन्नुपवनं जगाम । तत्र हंसान्वीक्ष्य तेष्वेकं जग्राह । ोतः स खगस्तमब्रवीत् 'भो राजन्, मा मां वधीः । तव प्रियं करिष्यामि । दमयन्त्याः सकाशे त्वां प्रति तथा कथयामि, यथा सा ा विनान्यं मनसापि न मन्येत' इति ।

तथेति तेन मुक्ते तस्मिन् सर्वे ते हंसाः कुण्डिनाख्यं विदर्भनगरं समुत्पत्य दमयन्त्याः समीपे निपत्य भुवि विससृपुः । तान् प सखीभिः सह तद्ग्रहणायोपधावन्त्यां तस्यां बालायां तया लक्ष्यी-

Digitized by Google

कृतो हंसो मानुष्या गिरा तामामन्त्र्याबभाषे—'अयि भैमि, ननु समुदीक्षितासि यौवनेन। तस्माच्छैशवोचितं विहारं विहाय किंचिद्वहिता शृणु। अस्ति निषधेषु नलो नाम राजा। यं पुण्यश्लोकमाहुः। निश्चिन्वेकत्र सर्वगुणसमाहाराय चिरप्रयत्नवतो विधातुः क्रियाकौशलसिद्धिर्नैषधाख्यः पदार्थ इति। यथा त्वं स्त्रीणां रत्नभूतासि, एवं स पुरुषाणाम्। विशिष्टयोः संबन्धो हि गुणवान् भवति। तस्मात्प्रयतस्व पुण्यश्लोकस्य गृहिणीपदप्राप्तये' इति। सा तु तं प्रत्याह—'निष्कारणबन्धो पतगोत्तम, यथा स राजा मय्यनुकम्पेत तथा तस्मिन्नपि व्याहरन् वाचा धर्ममवाप्नुहि' इति। तथेति ते हंसा नले तद्वार्तां निवेद्य यथागतं गताः।

दमयन्ती तु ततः प्रभृति बलवन्नलाक्रान्तहृदया मदनज्वरेण क्षामक्षामाङ्गी च बभूव। तदाज्ञाय राजा प्राप्तयौवनां कन्यामप्रतिपादयन् पिता वाच्यो भवति। कन्या च शोच्या स्यात्। तदवश्यं मयास्याः स्वयंवरः कारयितव्य इति निश्चित्य तदर्थं सर्वान् क्षत्रियानाकारयामास।

अत्रान्तरे सुधर्मां प्रविशन्तौ नारदपर्वतावृषी पूजयन्निन्द्रः प्राह—'ननु भगवन्तौ, प्रत्यहं युधि निहतानां पार्थिवानां नवनवः समागमोऽत्र बभूव। स कथमिदानीं विच्छिन्न इव भाति' इति। तं नारदः प्रत्यब्रवीत्—'भोः, शृणु तत्र कारणम्। अस्ति विदर्भराजस्य भीमस्य दमयन्ती नाम कन्या। तां सर्वासां स्त्रीणां रत्नभूतामवधेहि। अचिरादेव तस्याः स्वयंवरो भविष्यति। तां प्रार्थयन्तः

Digitized by Google

सर्वेऽप्यमी राजानस्तत्पुरं प्रत्यभिधावन्ति । अतोऽद्य समरसंरम्भो विरत इव' इति । तदन्तरे तत्रागता अग्नियमवरुणाश्च तच्छ्रुत्वा दमयन्त्यां जातरागाः शक्रेण सह स्वयमपि स्वयंवराय प्रतस्थिरे ।

प्रयान्तस्ते कुण्डिनस्य नातिदूरे स्वयंवरार्थमागच्छन्तं स्मरमिव मूर्तिमन्तं नलं वीक्ष्य दमयन्त्यां निराशा भूत्वा 'भो भो नैषध, त्वमस्माकं दूतो भवन् साहाय्यं कर्तुमर्हसि' इति तमब्रुवन् । स तु 'करिष्यामि' इति तेभ्यः प्रतिज्ञाय 'के यूयम् । किं वा मया कार्यम्' इति तान् पप्रच्छ । तत्क्षणं मघवानात्मानमन्यादींश्च यथावत्तस्मै व्याख्याय पुनराचख्यौ—'ननु राजन्, वयं हि चत्वारोऽपि दमयन्तीं प्राप्तुमागताः । तत्र त्वमस्माकं दूतो भवंस्तस्यां व्याहर, इन्द्रादयश्चत्वारस्त्वां प्रार्थयन्ते । तेष्वन्यतमं वृणीष्वेति' । नैषधस्तु सपद्येव भग्नोत्साहः प्राञ्जलिः प्रोवाच—'ननु भगवन्तः, यो यस्यां जातसंकल्पः स तामेव कथं परार्थमेवं वक्तुमर्हति । बलवती खलु भवतामिव ममापि दमयन्त्यामिच्छा । तस्मान्नार्हन्ति भवन्त एकार्थसमुपेतं मां तत्रैव दूतकर्मणा प्रेषयितुम्' इति ।

देवास्तु तं प्रत्यूचुः—'ननु भोः, करिष्यामि इति पूर्वमस्मासु प्रतिज्ञाय न युक्तं हि पश्चादेवं कृपणं जल्पितुम् । तस्माद्गम्यतामनुत्तरम्' इति । स तु तत्क्षणं व्यावर्त्य भैमीगतं चेतः 'गुप्तिमत्यन्तःपुरे कथं मम प्रवेशः स्यात्' इति तान् पृच्छन् 'प्रवेक्ष्यसि' इति शक्रेणोक्तस्तथेति गच्छन् केनाप्यनिवारित एव दमयन्त्याः समीपमुपजगाम । उपगच्छंश्च स तत्र महति दारिकामण्डले चन्द्रमण्डलीमिव

Digitized by Google

तारकामण्डले विशेषेण शोभमानां तां वीक्ष्य सपद्येव प्रतिबोधितामिवोज्जृम्भमाणं कामं धैर्येणान्तर्निगच्छति स्म ।

दमयन्ती तु समीपमुपसर्पन्तं तमालोक्याकृत्यैव कमपि प्रभावन्तं पुरुषविशेषमवधार्य, तत्संभावनाकृतत्वरा सखीभिः सह ससंभ्रमं मुक्तासना बभूव । तस्य तेजसा जडीभूतास्विव स्थितासु सखीषु दमयन्ती शनकैस्तमाजभाषे—'रूपमेवार्यमर्हत्तममवगमयति । तथा स्वरूपेणाप्यवगन्तुमुत्कण्ठते मे मनः ॥ किं च बलवद्रक्षितेऽत्र राजन्युग्रशासने च सत्यपि कथं न केनाप्यलक्षितः प्रविष्टो भवान् ।

स तु तां प्रत्यूचे—'अयि राजपुत्रि, नलं नाम नैषधं देवानां दूतकर्मणा त्वामुपस्थितं च मां विद्धि । इन्द्राग्नियमवरुणाश्चत्वारो देवास्त्वां प्रार्थयन्ते । तत्प्रभावेणैव बलवद्गुप्तिमत्यपि तवावरोधे समानिरोधो बभूव । ब्रूहि कतमस्तेषु ते पतित्वेन रोचत इति' । सा तु तान्देवानुद्दिश्य नमस्कृत्य नलं प्राह—'नाथ, योऽयं ममात्मा यच्चान्यन्मदीयं वसु तत्सर्वं हंसवाक्यश्रवणसमकालमेव त्वदधीनं कृतम् । त्वत्प्राप्त्यर्थमेव हि सर्वेऽप्यमी राजानोऽत्र संनिपातिताः । तस्मात्त्वदेकभक्तां मां भजस्व । वैपरीत्ये तु विषाग्न्यादिनात्मानं त्यक्ष्यामि' इति । नलस्तु तां पुनरुवाच-प्रार्थयमानेषु लोकपालेषु तेषां पादरजसाप्यतुल्यं मानुषं कथमिच्छसि । तेषां विप्रियमाचरन् हि मर्त्यः कथं न मृत्युमृच्छेत् । तस्मात्त्रायस्व मां देवताविरोधकृताद्भयात् । वृणीष्व च तेष्वन्यतमम्' इति । सा तु 'त्वामेव भर्तारं वृणे' इत्युक्त्वोच्चैः प्ररोदितुमारब्धा सती 'कथं परार्थं दूत्येनागत्य तेनैव स्वार्थं साधयतु

Digitized by Google

नलः' इति ब्रुवति तस्मिन् पुनरब्रवीत्—'भो राजन्, आगच्छन्तु भवान् ते देवाश्च स्वयंवरसभाम्। तत्र तेषां संनिधौ त्वां वृणे। ततस्त्वयि दोषो न स्यात्।' इत्युपायमुक्त्वा च तं विससर्ज। सोऽपि तथेति तान् देवानेत्य सर्वं दमयन्तीसंवादं तेभ्यो यथावन्निवेद्य तदनुमत्का स्वं शिबिरमाससाद।

अथ प्राप्ते स्वयंवरदिने महता राजमण्डलेन मण्डितां सभां वरणस्रजा सह प्रविष्टा सा भैमी तत्र तं तं राजानमतीत्य नलं लक्ष्यीकृत्य पर्यटन्ती क्वचिन्नलाकारान् पञ्च पुरुषानपश्यत्। दृष्ट्वैव सा निर्विशेषाकारां तां पञ्चनलीं विस्मिता देवेभ्यो नलं विवेक्तुकामा यानि देवतालिङ्गानि स्थविरेभ्यः श्रुतानि तानि तेषु सुनिपुणं निरूपयामास। यदा तु सुसूक्ष्ममपि तेषु नान्तरमुपलभते स्म तदा तानेव देवान् शरणं व्रजन्ती सा बाला प्राञ्जलिरिदमाह—'यदि हंसवाक्येन मया नलः पतिर्वृतः, यदि च मनसा वाचा कर्मणापि न व्यभिचरामि, तदा लोकवृत्तसाक्षिणो देवाः पुण्यश्लोकं मे पतिं दिशन्तु। गृह्णन्तु च स्वं स्वं रूपम्' इति।

सपदि कृतप्रसादेष्वभौमानि स्वानि लिङ्गानि प्रकाशयत्सु देवेषु सा स्वयमस्पन्दिना नेत्रेणास्वेदिना गात्रेणामहीस्पृशाङ्घ्रिणा च तांश्चतुरोऽप्यनिमिषान्, तथा तद्विलक्षणेन चक्षुर्निमेषादिलक्षणेन नलं च सम्यगवधार्य, तान्देवान् प्रणम्य तस्य नैषधस्य कण्ठे वरणस्रजमर्पयामास। देवास्तु तुष्टा नलायाष्टौ वरान्ददुः। तत्र शक्रो यज्ञे प्रत्यक्षदर्शनमनुत्तमां गतिं च प्रादात्। अग्निस्तु तदिच्छयाग्निस-

Digitized by Google

मुद्भवमात्मसालोक्यं च दत्तवान् । धर्मराजः पुनरन्नरसं धर्मे रतिं चानुगृहीतवान् । वरुणस्तावत्तदिच्छया जलोत्पत्तिमुत्तमां स्रजं च प्रसादीकृतवान् । एतावताप्यपरितुष्टास्ते देवा एका पुत्री एकः पुत्रश्चेत्यपत्यद्वयं जायतामिति संभूयैकं वरं दत्त्वान्तर्हिताः ।

अथ यथाविधि निर्वृत्तविवाहमङ्गलो नलस्तया नवोढया सह स्वपुरमासाद्य तत्र तस्यां गृहलक्ष्म्यां तथा राज्यलक्ष्म्यां च समसंविभक्तयौवनश्रीश्चिरं विजहार । ततः स कालेन तस्यां भैम्यामिन्द्रसेनाख्यं पुत्रमिन्द्रसेनाख्यां पुत्रीं चोत्पादयामास ।

॥ इति नलोपाख्यानसंग्रहे प्रथमो भागः ॥

॥ द्वितीयभागः ॥

इत्थं दमयन्तीनलावनुगृह्याग्न्यादिभिः सह त्रिदिवं गच्छन्निन्द्रः पथि द्वापरेण सह त्वरितमापतन्तं कलिं 'एवमतित्वरया कुत्र धावसि' इति पप्रच्छ । दमयन्तीं वरीतुमिति प्रतिब्रुवन् स कलिः 'वृतो ह्यस्मत्संनिधौ तया नलः' इति तेन प्रत्युक्ते, सक्रोधमिदमाह—'आः किमेतत् । कथं तिष्ठत्सु युष्मासु मानुषमवृणीत सा धृष्टा । तर्हि कर्तव्यमवश्यमेव तस्या दण्डधारणम्' इति । तदाकर्ण्य ते देवाः प्रत्यूचुः—'ननु भोः, अस्मदनुमत्यैव खलु तया नलो वृतः । का च वा प्राज्ञा कन्या समस्तगुणानामावासभूतं मन्मथमन्मथं तादृशं पुरुषपुंगवं

Digitized by Google

न वृणीत। वरं हि तस्यां दण्डधारणादात्मानमेवात्मना हिंसितुम्।' इति तमधिक्षिप्य यथागतं गताः।

गतेषु तेषु स कलिर्द्वापरमुवाच—'सखे, न खल्वेवं देवतावहेलनसमुत्थितं कोपमुपसंहर्तुमुत्सहते मे चेतः। अतोऽहं नले वसंस्तं राज्याद्दमयन्त्याश्च प्रभ्रंशयिष्यामि। तत्र त्वमक्षान्समाविश्य मम साहाय्यं कर्तुमर्हसि' इति। तथेत्यभ्युपगतवता तेन सह नलस्य पुरं प्राप्य कलिस्तत्र तस्मिन् प्रवेष्टुमन्तरप्रेप्सुश्चिरमुवास। अथ व्यतीतेषु द्वादशसु वर्षेषु तावदलब्धान्तरः स कदाचिद्धाविनोऽर्थस्य बलेनाकृतपादशौचं संध्यामुपासीने तस्मिन् राजनि लब्धान्तरः सहसाविवेश। संदिदेश च वृषरूपेण तस्यैवानुजं पुष्करमेत्य 'दीव्य तव ज्येष्ठभ्रात्रा नलेन! तत्र तवाहं जयं संपादयामि' इति।

पुष्करस्तु तथा नलं प्राप्य प्रेक्षमाणायां भैम्याम् 'अक्षविहारं करवाव' इति पुनः पुनरब्रवीत्। तदभ्युपगच्छन् स मानी तथेति कनीयसा भ्रात्रा पुष्करेण सह देवितुमारेभे। तदा द्वापराक्रान्तेषु पाशकेषु सर्वथा विपरिवर्तमानेषु स्वयं प्राज्ञतमोऽपि स नैषधः कलिबलेन मोहितः सन् 'अनेन जेष्याम्यद्य जेष्यामि' इत्युपर्युपरि ग्लहग्रहणव्यग्रो नाबुध्यत प्रतिक्षणं क्षीयमाणमायुःसंचयमिवात्मनः कोशसंचयम्। यथा यथा चायं जीयते तथा तथास्य द्यूतेऽनुरागपिशाचिका वर्धते स्म।

तदाकर्ण्य पौराः प्रतिबोध्य तं ततो निवर्तयितुकामा मन्त्रिभिः सहिता राजद्वारमेत्य स्वागमनं द्वारपालमुखेन राज्ञे न्यवेदयन्। देवी तु बहिरेव श्रोत्रयोस्तन्निवेदनाक्षराण्यवधूय भूताविष्ट इव 'इदमिदम्'

Digitized by Google

इत्युत्तरोत्तरपणनोपरक्तचित्ते भर्तरि, स्वयं भृशमार्ता तदन्तिकमुपगम्य शनकैरिदमाह—'नाथ, दीयतामवसरो दिदृक्षोः सामात्यवर्गस्य पौरजनस्य' इति। एवमसकृत्प्रोच्यमानं प्रियावचनमप्यनादृत्य, 'रे पुष्कर, कामं जीयतामिदम्। इदमपरमुपादीयते पणनाय। अन्यदपि विपुलमस्ति मे वित्तम्।' इत्यादिधूर्तालापमुखरे तस्मिन्, तदवेत्य नागरा मन्दोत्साहाः सन्तः 'नायमस्ति' इत्युक्त्वा परामताः। भैमी तु विपन्मुक्तप्रविष्टमिवात्मानं मन्यमाना धात्रीमाह 'अयि बृहत्सेने, उच्यतामस्मात्परिवर्गो महाराजवचनात् 'ज्ञायतां कियद्धनमवशिष्यते' इति। तया तथोक्ताः सचिवा राजानं द्यूतमूर्च्छया विमुच्यमानमिव मन्वानाः पुनरपि नागरैः सह तत्प्रतिबोधनार्थमागत्य द्वारपालं प्रेषयामासुः। पूर्वतोऽप्यधिकतरं द्यूतासक्तचित्ते तदुपरोधभूतां दौवारिकस्य विज्ञापनामनभिनन्दति भर्तरि, नैराश्येन शिथिलानुरागे प्रतिप्रयाते पौरवर्गे प्रक्षीणप्राये च सर्वस्वे, सा वैदर्भी पिपतिषति कूले तिष्ठन्तमिवासन्नविनिपातमात्मानमवधार्य, वार्ष्णेयनामानं सारथिमाहूयाह 'ननु सौम्य, पश्य यस्मिन् परमाणुकल्पमपि किल्बिषमुत्प्रेक्षितुमशक्यं तादृशस्य महाराजस्याकस्मादीदृशं व्यसनम्। प्रक्षीणप्रायं किल सर्वस्वं च। अतो न शुध्यति मे हृदयम्। यौ ममेमौ दारकौ तौ राज्ञो रथमारोप्य मम पितुर्गृहं प्रापय। एवं स्वामिनोऽनृणो भूत्वा स्वैरं याहि' इति। सोऽपि तथेति तत्पुत्रौ राज्ञो रथेन विदर्भेश्वरं नीत्वा भृशं दुःखितोऽयोध्याधिपतिमृतुपर्णं सूतकर्मणोपस्थितवान्।

नलस्तु जितसर्वस्वो भूत्वा 'भोः, दमयन्त्या दीव्य। नास्ति

Digitized by Google

तेऽन्यद्धनम्' इति पुष्करेणावहासितः सन् स्वाङ्गात्सर्वाभरणान्यवतार्य तूष्णीं प्रवव्राज। दमयन्त्यपि तथा प्रव्रजन्तं स्वनाथं वीक्ष्य स्वयं परिधानमात्रशेषा तमन्वधावत्। यद्यत्र कश्चिन्नलं पूजयेत्स मे वध्यः स्या-दिति पुष्करेणाघोषिते, ततो भयेन नलस्याविनयेन च निर्विण्णा नागराः सत्कारार्हं तस्मिन् राजनि प्रव्रजत्युदासीना बभूवुः।

पत्नीद्वितीयो नगराद्बहिरेव त्रिरात्रं जलेन वृत्तिं कल्पयन् स नैषधः सर्वैरपि नगरवासिभिरनादृतः क्षुधा च परिपीड्यमानस्ततः प्रतस्थे। ततः पथि दिव्यरूपान् शकुनिनो वीक्ष्य व्यचिन्तयत्—'अये, हिरण्यपक्षा ह्येते पक्षिणः। तदेतेषु गृहीतेषु द्विधा ममार्थसिद्धिर्भवति, मांसेन क्षुन्निवृत्तिः पक्षहिरण्येन धनलाभश्चेति। तदेतान् ग्रहीष्यामि' इति निश्चित्य परिधानवस्त्रमादाय तदुपरि चिक्षेप। ते तु तद्वस्त्रेण सहोड्डयमाना इदं जगुः—'अयि दुर्बुद्धे, जानीह्यस्मांस्तव पराजयहेतुभूतानक्षान्। एते वयं सवाससि त्वय्यप्रीयमाणास्तदाहरामः' इत्युक्त्वान्तर्हिताः।

एवं तैर्हृतवस्त्रो राजा पार्श्वगतां दमयन्तीमाह—'प्रिये, येषां प्रकोपान्मम राज्याद्भ्रंशः प्राणयात्रायाश्च संशयः सर्वत्र चासंभावना बभूव, त इमे प्रव्रजितेऽपि सवाससि मय्यप्रीताः शकुनिरूपेण मां विवाससं चक्रुः। अहो दशाया वैषम्यम्। ननु वैदर्भि, अयमेव दक्षिणापथः। अयं तु पन्था विदर्भान् गच्छति' इत्यसकृदुवाच। तद्वाक्येन पर्याकुला सा तं पप्रच्छ 'नाथ, किमिदं ते व्यवसितम्। कथमीदृशे व्यसने त्वां परित्यज्य गच्छेयम्। आतुरस्येव विपन्नस्य

Digitized by Google

पुंसः कलत्रं खलु दिव्यौषधमिव हिततमम्' इति। आत्मानं वापि परित्यजेयं, न पुनस्त्वामिति तेन प्रत्युक्ते, सा पुनः प्राह—'नाथ, यदि मां हातुं नेच्छसि, तदा किमित्येवमसकृद्विदर्भाणां पन्थास्त्वयोपदिश्यते। मया च ज्ञातपूर्व एव। अथ मन्यसे मां स्वजनं नेतुम्। तदा सहैवावां मम पितुर्गृहं गच्छाव। मम पिता तु त्वां पूर्वतोऽप्यधिकतरं मानयिष्यत्येव' इति।

स तु तां सानुनयमाह—'अयि भैमि, यथा तव पितुस्तथा ममापि राज्यमासीत्। पूर्वं समानया समृद्ध्या सर्वेषां बहुमानार्हो गत्वा, कथमिदानीमेवं दुर्गतः शोच्यतमः श्वशुरगृहं यायाम्। लोके च सुखस्थो हि लोको बन्धूनालोकयितुमिच्छति न विषमस्थः। अतो न युक्तमधुना तत्र गन्तुम्' इति सान्त्वयित्वा तस्या वाससैव स्वयं परिधानं कृतवान्। तथैकवाससा संवीतौ तौ दम्पती कुत्रचिदरण्ये शून्यां कांचन सभां जग्मतुः। तत्र श्रान्त्या भुवि प्रसुप्तायां दमयन्त्यां स राजा व्यचिन्तयत्'अहो बतेयं राजपुत्री स्वप्नेऽप्यतर्कितामिमां दशां प्राप्य मदर्थमेवं परिक्लिश्यते। यदीतः परमपि मामनुवर्तिष्यते तदा इतोऽपि महत्तरं दुःखमियमनुभविष्यति। दारुणो हि मयि विधेरारम्भः। मयोत्सृष्टा त्वेषा कदाचित्स्वजनान् गत्वा सुखिनी स्यात्। निश्चिताद्दुःखाद्धरं हि संशयितं दुःखम्। न च स्वतपसा गुप्तामेनामलं खलु देवा अपि प्रधर्षयितुम्। तस्माद्यावदियं न प्रबुध्यते, तावदेव मयापक्रमितव्यम्' इति निश्चित्याकस्मात्पार्श्वगतेन खड्गेन तद्वाससोऽर्धं छित्त्वा कियच्चिद्दूरं धावन् पुनः प्रत्यावृत्य तस्याः पादमूले निपपात।

Digitized by Google

निपत्य च 'अयि निष्करुण, कथमनन्यपरायणामात्मनः प्रत्ययेन प्रसुप्तां जायां विजने वने परित्यक्तुं धृष्णोषि' इत्यात्मानं विगर्हयन् 'हा विदर्भराजनन्दिनि, हा निषधेश्वरसर्वस्वभूते, हा दमयन्ति, मया पापेनोत्सृष्टासि । रक्षन्त्वेनां वनदेवताः' इति रुदन् कलिबलेन मोहितः प्रदुद्राव ।

ततः प्रबुद्धा सा तमदृष्ट्वा भृशमुद्विग्ना सती 'हा नाथ, हा पुण्यश्लोक, क्व नु मामुत्सृज्य गतोऽसि ।' न त्वां त्यजामि' इति तव गीरपि कथमेवं वितथा भवति । नाथ, कृतं परिहासेन' इत्यादि बहु विलपन्ती, 'असौ दृश्यते, एष दृश्यते' इति तत्र तत्र प्रधावन्ती, 'भद्र, ब्रूहि मे कच्चित्त्वया दृष्टः पुण्यश्लोकः' इति वृक्षादीन् पृच्छन्ती कस्यचिदजगरस्य मुखे पतिता सती 'महता सर्पेण गृहीताहं व्यापद्ये' इत्युच्चैर्विचुक्रोश । तदाकर्ण्य कश्चिद्व्याधः सद्यः प्रयुक्तेन शरेण तमजगरं निहत्य तां मोचयामास ।

मोचिता च सा आत्मनो रूपेण मोहितं संकटान्मोचनसंबन्धेनान्तरीभूय बलादात्मानं प्रधर्षयितुं प्रवृत्तं तं व्याधहतकं गत्यन्तराभावेन शापाग्निना भस्मसात्कृतवती । तत्प्रसङ्गेन च सा 'यो निर्दोषं मम भर्तारमाविश्यैवं व्याकुलयति सोऽपि मत्तोऽप्यधिकतरं कृच्छ्रवसतिं वसतु' इति पुनः शशाप । ततश्च सा रात्रिंदिवमविश्रान्ततया 'पुण्यश्लोक' इति विकुश्य वनाद्वनं विचिन्वती त्रिराश्रान्ते क्वचित्तापसाश्रमं दृष्ट्वा तान्मुनीन् प्रणम्य स्वभर्तुः प्रवृत्तिं तानपृच्छत् । 'अचिरात्तं द्रक्ष्यसि' इति तामाश्वास्य तिरोहितेषु

Digitized by Google

तेषु विस्मिता सा पुनरप्युत्तरां दिशं प्रययौ । तत्र सुदूरमेकाकिन्येव व्रजन्ती गजाश्वादिसंकुलं वणिक्सार्थं दृष्ट्वा किंचिच्छब्वाश्वासेव तन्मध्यं प्रविवेश ।

तत्र विकृतेन तस्या वेषेणाप्राकृतेन तेजसा च भीताः केचन सार्थवाहाः प्रदुद्रुवुः । अपरे तु तत्र तत्र निलिल्युः । इतरे पुनः 'हा हताः स्मः' इति विचुक्रुशुः । एवं पर्याकुलेषु तेषु शुचिर्नाम सार्थवाहो धैर्येण तस्याः समीपमुपगम्य पप्रच्छ—'अयि कल्याणि, किं त्वमस्य वनस्य रक्षी देवतासि । उत वा यक्षी यास्माभिराराध्यस्य यक्षराजस्य मणिभद्रस्य प्रिया । आहोस्विद्या काचनान्या देवता । न त्वां मानुषीं मन्यामहे । त्वद्दर्शनेनैव समुद्विग्ना वयम् । तद्भद्रे, विधत्स्वास्माकं भद्रम् । त्वां शरणं प्रपन्नाः स्मः' इति । सा तु, तद्वाक्येन दूयमानहृदया प्रत्याह—'भोः, मा मैष्ट मत्कृते । अहं मानुष्येव न देवता । राज्ञो नलस्य भार्यां दमयन्तीं नाम वैदर्भीं मां विजानीत । साहमिदानीं भर्तुरसंनिधानेन दुःखिता तमन्विष्य पर्यटामि । स यदि युष्माभिर्दृष्टस्तं ब्रूत । कुत्र वा युष्माभिर्गम्यते, तच्च मे कथयत' इति । 'न दृष्टो नलः । अस्माभिस्तु चेदिविषयो गम्यते' इति तैः प्रत्युक्ते, 'मयि कृपया मामपि तन्नगरं नयत' इति ताननुनयन्ती सा तैः सह प्रयाति स्म । अथ प्रयान्तस्ते सार्थवाहाः श्रान्ताः सायं कस्यचित्तटाकस्य तीरे कृतसंनिवेशा यथासुखं सुषुपुः । दमयन्त्यपि तत्रैव क्वचिदेकान्ते स्थण्डिले शेते स्म ।

अर्धरात्रसमये वन्यानां गजानां यूथं यदृच्छया तत्र पानीयार्थ-

Digitized by Google

मागत्य तदितरगजगन्धेन क्षुभितं सत् तदुन्माथाय द्रुतमभिदुद्राव । तद्गन्धाघ्राणेनैव भीतेषु शृङ्खलादिकमाच्छिद्य पलायमानेषु ग्राम्यगजेषु, तानुद्रवत्सु च तेष्वारण्यकेषु, तत्र तत्र सुखप्रसुप्ताः सार्थवाहास्तत्पदाक्रान्ता बहवो विनिष्पिष्टा विनेशुः । सपदि समुत्थितेषु तु शेषेषु गुल्मकोटरादिकमाश्रित्य प्रलीनेषु, सर्वं मुहूर्तमाकुलीकृत्य ते वन्या गजाः प्रतिप्रयाताः । महता तेन कदनेन समुत्थिते हाहाकारे, स्वयं प्रबुद्धा सा राज्ञी घृणाक्षिप्तचित्ता भृशं प्रव्यथिता बभूव । शान्ते तु तस्मिन् क्षोभे शिष्टाः सार्थवाहाः संभूय, 'अननुभूतपूर्वस्यास्यानर्थस्य को वा हेतुः स्यात्' इति मन्त्रयामासुः । तत्र मणिभद्रोऽद्य सम्यङ्नाराधितः इति यक्षराजो न पूजित इति विघ्नेश्वरो न प्रसादित इति ग्रहा नानुकूलाः इति च भिन्नभिन्नं जल्पत्सु, तानाक्षिप्यापरे प्रोचुः 'या काचनास्मत्संघे पिशाचिकेवोन्मत्तरूपा दृश्यते, तस्या एवेदं कर्म । अतो यदि सेदानीं दृष्टिपथे भवेत्तदा तां लोष्टपाषाणादिना हन्याम' इति । तच्छ्रुत्वा व्रिया भिया च कलुषीभूता सा साध्वी किंचिदन्तरं पलाय्य क्वचित्स्थित्वा व्यचिन्तयत्—'अहो कथमेतावन्तमनर्थं मयि संयोज्यापि न तृप्ता नियतिः । नमो देवेभ्यः । प्रसन्नास्ते कृपणायां मयि कृपां कुर्वन्तु' इति शक्रादीन् प्रार्थयामास।

तावदुदिते सवितरि पुनः प्रस्थितैस्तैः सह गच्छन्ती सा सायाह्ने चेदिराजस्य सुबाहोर्नगरमाससाद । तदा यदृच्छया प्रासादगता राजमाता रथ्यायामर्धवस्त्रेण चरन्तीं तामवलोक्य संजातकुतूहला तामाहूय तन्नामवृत्तादि पप्रच्छ । सा तु बाष्पपूर्णाभ्यां नेत्राभ्यां

गद्गदेनाक्षरेण च तां प्रत्याह 'राज्ञि, पतिपरायणां सैरन्ध्रीं मां विद्धि। साहं भर्तुः सकाशात्प्रभ्रष्टा तमन्विष्य पर्यटन्ती भवत्यासादितास्मि' इति। तदाकर्ण्य दयार्द्रभावा सा राजमाता तां सान्त्वयामास—'अयि वत्से, प्रक्षीणं ते दुःखम्। तव मातरीव मयि कृतप्रणयात्रैव वस। अहं तव भर्तारं दूतैरन्विष्यानेतुं यतिष्ये' इति। सापि साञ्जलिस्तां प्रत्यूचे—'अम्ब, दुर्लभाः खलु प्रायेणास्मिन् लोके त्वादृश्यः कृपणपक्षपातिन्यः स्त्रियः। तदप्रत्याख्येयं ते शासनम्। किं तु, यदि मां कश्चन प्रार्थयेत पश्येद्वा स ते वध्यः स्यात्। भर्तुरन्वेषणार्थेन तु ब्राह्मणाः केवलं मां यथावसरं पश्यन्तु। अनियोज्या चाहं त्वयान्यया वा परस्योच्छिष्टादौ। यद्येतदनुमन्यसे तदा तव गृहे वत्स्यामि' इति। तदाकर्ण्य प्रमुदिता राजमाता 'अयि महाव्रते कल्याणि, इदं हि नाम पातिव्रत्यं यदनर्थपरम्परयाप्यप्रच्युतचित्तत्वम्। तद्भद्रे, यथा ते मतं तथा करोमि' इति तां प्रशस्य स्वपुत्रीमाहूय 'वत्से सुनन्दे, अस्याः शीलेन प्रीतास्मि। तदेनां भगिनीनिर्विशेषमुपलालय' इत्युक्त्वा तस्यां तामर्पयामास।

नैषधस्तु दयितामुत्सृज्य गच्छन् दावाग्निना परीतस्य वनस्य मध्ये 'अभिधाव पुण्यश्लोक, अभिधाव मत्परित्राणाय' इत्यार्तनादं शुश्राव। 'मा भैषीः' इति त्वरया तं प्रदेशं प्राप्य तत्र कुण्डलिताकारं कंचन सर्पमद्राक्षीत्, अप्राक्षीच्च 'कस्त्वं का च ते व्यथा' इति। स एनमुवाच—शृणु राजन्, अहं किल कर्कोटको नाम नागराजः पुरा नारदमवमत्य कुपितेन तेन 'स्थावरवत्तिष्ठ' इति शप्तोऽस्मि।

Digitized by Google

मया पुनरनुनीतः स मुनिः 'यदा त्वां नलः स्थानान्तरं नेष्यति, तदा मोक्ष्यसे' इति शापान्तमूचिवान् । ततः प्रभृति पदात्पदमपि चलितुमशक्नुवन्नहं तवागमनं प्रतीक्ष्य स्थितोऽस्मि। अतो मामग्निना दह्यमानादस्मात्स्थानात्स्थानान्तरं प्रापय । तत्र ते श्रेयो विधास्यामि' इति । तेन तथा कृते शापान्मुक्तः स नागः 'राजन्, स्वानि कतिचन पदानि गणयन् याहि। ततस्ते श्रेयो विधास्यामि' इति तमुवाच। स तथेति स्वपदानां गणनेन गच्छन् दशमे पदे यदा 'दश' इति संख्यामुच्चारयामास, तदा स सर्पस्तं दशति स्म । दष्टमात्रश्च स ह्रस्वबाहुर्विकृताङ्गश्च संवृत्तः । तदा प्रकृतिमापन्नः कर्कोटकस्तं सानुनयमाह—राजन्, इदानीं कंचित्कालमज्ञातेनैव त्वया वस्तव्यम् । अतस्त्वद्रूपपिधानार्थं त्वच्छरीरे वास्तव्यस्य कलेः संतापार्थं च मया दष्टोऽसि । तदनेनैव रूपेणायोध्याधिपमृतुपर्णमेत्य तं कंचित्कालमुपास्स्व। तत्र ते श्रेयो भविष्यति । यदा तु स्वं रूपमाप्तुमिच्छसि, तदा परिधत्स्वेदम् ' इति तस्मै वस्त्रद्वयं प्रदायान्तर्हितः । तद्वाक्यमादाय तूर्णमृतुपर्णमुपेत्य स नृपः 'महाराज, बाहुको नामाहमश्वविनयनेऽन्नरसकरणे शिल्पकर्मणि च कुशलोऽस्मि । तस्य मे वृत्तिं कल्पय' इति प्रार्थयामास । शीघ्रगमने समुत्सुकः स तु तद्वाक्यमभिनन्द्य तमश्वानामध्यक्षं वितन्वन् पूर्वं तत्राधिकृतौ जीवलवार्ष्णेयौ च तस्यानुचरौ चकार ।

॥ इति नलोपाख्यानसंग्रहे द्वितीयभागः

Digitized by Google

॥ तृतीयभागः ॥

विदर्भराजो भीमस्तु नलं द्यूतव्यसनेन राज्यात्प्रभ्रष्टं भार्यया सह प्रव्रजितं चाज्ञाय तद्गतिपरिज्ञानाय कृतमतिर्ब्राह्मणानाहूय मन्त्रयामास 'ननु भगवन्तः, श्रूयते किलास्मज्जामातुर्निषधेश्वरस्य दुःश्रवो दशाविपाकः । ईदृशे व्यसने तमाश्वास्य तद्दुःखलघूकरणं हि बन्धुकृत्यम् । तस्मादावश्यकं तदन्वेषणे भवतः शरणं प्रपन्नोऽस्मि । अतो यूयं मयि कृपया तौ दमयन्तीनलावानयत । आनेतुमशक्यत्वेऽपि तयोः स्थानपरिज्ञानमन्यतरदर्शनमपि मे प्रियमेव स्यात् । तथोपकृतवतां तु सर्वमपि मे राज्यं निष्कृतये न पर्याप्तम्' इति प्रशस्य धनेन तान् पूजयित्वा तन्मार्गणाय प्रस्थापयामास ।

तथा प्रवृत्तेषु तेषु सुदेवो नाम ब्राह्मणस्तत्र तत्र पर्यटन् यदृच्छया चेदिराजस्य गृहं प्राप्तस्तत्र संगतैर्ब्राह्मणैः सह पुण्याहं वाचयामास । तदन्तरे तत्र सुनन्दया सह चरन्तीं दमयन्तीं वीक्ष्य तदन्तिकमेत्य प्रोवाच—'अयि भैमि, कच्चित्कुशलिनी वर्तसे । दिष्ट्या त्वां स्वस्तिमतीं पश्यामि । तव मातापितरौ भ्रातरोऽन्ये च ते बान्धवाः सर्वे स्वस्थास्तव दुःखेनास्वस्थाश्च । त्वदन्वेषणाय प्रेषितेषु विप्रेष्वन्यतमं तव भ्रातुः सखायं सुदेवं मां विजानीहि । तव दारकौ हि तव बन्धुभिर्भृशमुपलाल्यमानावपि त्वद्दुःखेन दुःखितौ सन्तौ सर्वमेव राजकुलं भूयस्तरां दुःखसागरे निमज्जयतः' इति ।

Digitized by Google

तं स्वजनवृत्तान्तमाकर्ण्योत्कण्ठिता सेयं तं द्विजं प्रणम्य यावत्किमपि प्रष्टुमुपाक्रमत, तावदुत्थितेन दुर्निवारवेगेन शोकावेगेन स्तम्भितवृत्तिरक्षिभ्यां बाष्पपूरं वर्षन्ती 'हा हा' इति विचुक्रोश। तत्सुनन्दामुखादवेत्याभिपतिता राजमाता 'भो ब्रह्मन्, कस्त्वं, केयं, कीदृशं वास्या व्यसनं, कथं त्वया प्रतिपन्ना, सर्वं तथ्येन मे ब्रूहि' इति तं पप्रच्छ। स तु तदुदन्तं यथावृत्तं यथाज्ञातं चोक्त्वा तामाह-'पश्यत्वत्रभवती मलेन च्छन्नं मेघच्छन्नमिव बालचन्द्रमसमस्या भ्रुवोर्मध्ये भ्राजमानं पिप्लुम्। अयमेव मे दर्शयामास चिरविप्रोषितामप्येनाम्' इति।

तदनु सरभसं सुनन्दया प्रक्षालिते तन्मुखमण्डले व्यभ्रे नभोमण्डले चन्द्रमण्डलमिव प्रकाशमानं तं पिप्लुमवलोक्य राजमाता तां कण्ठे समाश्लिष्य 'हा मम जाते, विदर्भकुललालामभूते, देवताभ्यर्थ्यसौन्दर्यमहोदये, व्रतकर्कशहृदये, हा राजाधिराजमहिषि, कथं त्वमपीदृशे दुर्जाते पतितासि। अहो निष्करुणो विधिः। ब्रह्मन्, इयं दमयन्ती मम भगिन्याः पुत्री। एषा तु मम पुत्री सुनन्दा। अस्याः प्रसवार्थं यदाहं मम पितृदर्शार्णपतेर्गृहं गता, तदैनां मम भगिनी प्रसूतवती। तदा मया दृष्टोऽयं पिप्लुरधुना निर्णयाङ्कः संवृत्तः' इत्युक्त्वा मुक्तकण्ठमुच्चैः प्ररुरोद। अथ युगपदेव प्ररुदिते सर्वस्मिन् राजकुले, दमयन्ती तामाश्वास्य प्राह—अम्ब, अनतिक्रमणीयं नाम भवितव्यम्। तदत्र किं विलापेन। अज्ञातसंबन्धयापि त्वया सुनन्दानिर्विशेषं पोषितास्मि। अधुना तु वत्सयोर्दर्शनोत्कण्ठा मां त्वरयति। तदविलम्बेन

Digitized by Google

प्रस्थापय [illegible] भीमन्या निवेशनम् ' इति । तत्क्षणं सा स्वपुत्रं सुबाहुमाहूय सर्व[illegible]वेद्य तेन सज्जितेन बलवद्भिर्मिता चतुरन्तयानेन दमयन्तीं कुण्डिन[illegible]यामास । आगतायां तु दुहितरि भीमस्यान्तःपुरं सर्वमपि [illegible]भ्यामाकुलितं बभूव । राजा तु कृतकार्यं सुदेवं महता धनेन [illegible] । दमयन्ती तु स्वजनं प्राप्य स्वपुत्रौ चाश्लिष्य किंचिन्निर्वृ[illegible]तं गमयामास ।

परेद्य[illegible] चोदयामास—'अम्ब, यदि मां जीवन्तं[illegible] पुण्यश्लोकेन मां संयोजयितुम्' इति [illegible] भृशदुःखिता भूत्वा रहसि राज्ञे निवेदयामास [illegible] शीघ्रं नलो नानीयते, तदा दुर्लभं वत्साया जीवितं [illegible]ति । तस्मादविलम्बेन सोऽन्वेष्टव्यः' इति । तदाकर्ण्य [illegible]धान्तो राजा पूर्ववद्ब्राह्मणानाहूय कार्यं चावेद्य ' दमयन्तीमापृच्छ्य यात' इति तान् शशास । तथेत्यापृच्छमानांस्तान् विप्रान् प्रणम्य सा साञ्जलिः सविनयमावेदयामास—'महत्खलु मम कार्यं युष्मास्ववस्थितम् । कृपणायां मयि कृपां कृत्वा मम प्राणेश्वरं निषधेश्वरं मे प्रयच्छत । युष्मास्वेव न्यस्तभारास्मि । तस्माद्भवन्तस्तत्र तत्र तं विचिन्वन्तः कार्यसिद्ध्या प्रत्यागच्छत । विचिन्वद्भिर्भवद्भिस्तु 'अयि कितव, सुप्तां प्रियां वाससोऽर्धेन परित्यज्य क्व नु प्रयातोऽसि । प्रसीदाद्यापि तस्यां तपस्विन्याम्' इति तत्र तत्रोद्घोषयितव्यम् । एतदाकर्ण्य, यः कश्चन प्रतिब्रूयात् विकृतिं भनेद्वा स विशिष्य ज्ञातव्यः' इति तान् प्रापयामास ।

Digitized by Google

अथ व्यतीतेषु गणरात्रेषु पर्णादो नाम कश्चिद्ब्राह्मणो दमयन्तीसमीपमेत्य कथयामास 'अयि राजपुत्रि, तत्र तत्र तव संदेशमुद्घोषयन्नहमयोध्यां प्राप्य तत्र राज्ञ ऋतुपर्णस्य सभायां च यथापूर्वमुदघोषयम् । तत्र राजा अन्यो वा न कोऽपि प्रतिब्रवीति स्म । ततो निर्गतं मां ह्रस्वबाहुर्बाहुको नाम राज्ञः सूतो मामेकान्ते सबाष्पमनुनयति स्म—'ननु ब्रह्मन्, अतिविषमस्था अपि भर्तरि क्रोधं नोत्सृजन्ति खलु चारित्रकवचाः पतिव्रताः । तन्न युक्तं हि दैवदुर्विपाकेन योन्यन्तरप्रविष्टमिव सीदन्तं भर्तारमुपालब्धुम्' इत्युक्त्वा प्रारुदत्' इति ।

सा तु तं संमान्य 'भर्तर्यागते भूयस्त्वां तोषयामि' इति तमनुज्ञाप्य मातरमेकान्ते प्राह—'अम्ब, तव संनिधौ किंचित्कार्यं चिकीर्षामि तदनुमन्यस्व । न चैतत्पित्रे निवेदनीयम्' इत्युक्त्वा ततो लब्धानुज्ञा सती सुदेवमाहूय प्रोवाच—ब्रह्मन्, त्वय्येव मे कार्यसिद्धिर्निश्चिता । अतस्त्वमनेन पथायोध्यां प्राप्य राजानमृतुपर्णं रहसि ब्रूहि 'दमयन्ती नलस्यालाभेन पुनः स्वयंवरमास्थिता । तदर्थं राजानः समागच्छन्ति । तस्या आशयस्तु त्वयि लग्न इव लक्ष्यते । एकाहान्तरितश्च स कालः । ततः शीघ्रं प्रयाहि' इति ।

स तथा तमुपेत्य विविक्ते तद्वचनमाचष्ट । तदाकर्ण्य दमयन्तीकामेन प्रवेगितः स राजा ससंभ्रमं नलमाहूय शशंस—'भद्र बाहुक, यदर्थं मया त्वं रक्षितोऽसि, प्राप्तो हि तस्य प्रयोजनस्य कालः । शृणोषि दमयन्तीं नाम वैदर्भीं वरवर्णिनीम् । सा किल स्वभर्तुर्नाशेन

Digitized by Google

पुनः स्वयंवरायोद्यता । श्वोभूतश्च स दिवसः । तस्यां सक्तं हि मे हृदयम् । तस्माज्जवनतमैरश्वैरनस्तमित एवाहस्करे कुण्डिनं नेतुमर्हसि' इति । वज्रपातेनेव कर्णौ विदारयता तेन वचनेन व्याघूर्णमानः स नैषधो व्यचिन्तयत् । कथं नु नामेदम् । किं दमयन्त्यपि विधूय धर्ममसज्जनसेविते पथि पदं निदध्यात् । किं वा मत्संग्रहव्यग्रायास्तस्यास्तदर्थोऽयमुपायः स्यात् । भवतु नाम यथा तथा वा। अहमस्य सूतकर्मणा तत्र गत्वा ज्ञास्यामि' इति निश्चित्य राजानमाह—देव, सावशेष एवास्मिन्नहनि त्वां कुण्डिनं नेष्यामि । पश्य मे हयेषु विज्ञानमित्युक्त्वा सुशिक्षितांश्चतुरोऽश्वान् परीक्ष्य तान् रथे योजयामास । 'अरे, महत्खलु कार्यमुपस्थितम् । दवीयानध्वा गन्तव्यः अल्पश्चकालोऽवशिष्टः । सत्येवं किमिति गन्तुमप्यशक्तान् दुर्बलानश्वान्योजयसि' इति राज्ञाक्षिप्तः स भूयस्तमुवाच—'शक्ताः खल्वेते ततोऽपि दूरतरमध्वानं गन्तुम् । अहमत्र प्रतिभूरस्मि । तथा ह्येषां लक्षणं लक्ष्यते । यदि न प्रत्येषि । ब्रूहि भवतोऽभीप्सितानश्वान् । तान् योजयामि' इति । तर्हि चोदयेत्युक्त्वा वार्ष्णेयेन सह रथमारूढे राजनि, प्रस्थितास्ते हया जानुभ्यां भुवि निपतिता नलेनाश्वासिताः सन्तः समुत्पत्याकाशमार्गेण प्रधावन्ति स्म ।

तेन प्रहृष्यत्यृतुपर्णे बार्ष्णेयश्चिन्तयामास—'अहो अन्यादृश्यमीषां गतिः । किमयं बाहुको मातलिर्भवेत्, आहोस्विदश्वशास्त्रस्य प्रणेता शालिहोत्रमुनिः स्यात् । उताहो अस्मत्स्वामी नल एव स्यात् । अस्य स्वरः क्रियाकौशलं वयश्च तत्स्वरादिना संवादि ।

Digitized by Google

रूपं तु केवलं विसंवादि भवति। भवतु सर्वं क्रमेण द्रक्ष्यामि, इत्यवस्थितवान्। तावदेव बहून् पर्वतान्वनानि नदीश्चातीत्य गरुडवेगेन प्लवमानेषु रथ्येषु, रथात्पतितमुत्तरीयमादातुकामो राजा 'क्षणमश्वान्नियच्छ, यावद्वस्त्रमाहरामि' इति नलमाह। अतिक्रान्तं खल्वध्यर्धयोजनमिति वदन्तं नलमृतुपर्णः प्रोवाच—'भद्र बाहुक, न क्वापि लोके सर्वज्ञता निष्ठां गता। अतो मयेदमुच्यते। यथा तवाश्वेष्वसाधारणं कौशलमेवं मम गणनेऽप्रतिमं पाण्डित्यमस्ति' इत्युक्त्वा संनिहितं विभीतकवृक्षं निर्दिश्य 'एतावन्त्येवास्मिन् फलानि पत्राणि च' इति तत्संख्यानिर्णयमूचिवान्। तदाकर्ण्य नलः सपदि हयान्नियम्य 'अप्रत्यक्षमिवेदं तव वचनं परीक्ष्य प्रत्यक्षयिष्यामि' इति परशुपाणी रथादवततार।

ननु महद्धि कार्यमुपस्थितं तदलं विलम्बेन। पश्चात्परीक्ष्यतामिति वदन् राजा 'नाकृत्वास्य निर्णयं कर्तास्मि कार्यान्तरं, यदि तन्नानुमन्यसे तर्हि बार्ष्णेयसारथिर्याहि' इत्युक्त्वा रथादवतीर्णं तं सानुनयमाह—'भद्र, तर्ह्येकां शाखां परीक्ष्य त्वरितमायाहि' इति। तथा तां शाखां गणयित्वा विस्मितो नल ऋतुपर्णमाह-'राजन्, नूनमन्यादृशं ते गणने पाण्डित्यम्। तां विद्यामश्वहृदयविनिमयेन मे दातुमर्हसि' इति। दमयन्तीगतेन संकल्पेन बलवदाकृष्यमाणस्तत्र क्षणविलम्बमप्यसहमानः स राजा स्वयं पङ्गुरिव तेन विना गन्तुमशक्तः संस्तदप्यङ्गीकृत्य, 'भद्र बाहुक, गृहाणाक्षहृदयं येन गणनेऽहमिवाद्वितीयः स्याः। अश्वहृदयं तु त्वय्येव न्यासभूतं तिष्ठतु। मन्दीभवन्ति

Digitized by Google

हि दिनकरस्य रश्मयः । अतो नालमितः परं मन्दायितुम्' इत्युक्त्वा तस्मै तां विद्यामुपदिदेश ।

तदुपदिष्टं तं मन्त्रं क्वचिदेकान्त उपविश्यावर्तयति नले तस्य शरीरात्कलिः स्वरूपेण बहिर्निर्जगाम । निर्गच्छंश्च स पापः क्रुधा शप्तुमुद्यतं नलं निवार्य ससान्त्वमिदं प्रार्थयामास—'भो दीनवत्सल, तव भार्यायाः शापेन कर्कोटकस्य विषाग्निना च भृशसंतप्तं मां किं पुनस्तापयितुमिच्छसि । तदलं सम्यक् शिक्षितस्य मे शिक्षया । इतः परं त्वन्नाम गृणतामपि विषयं न वीक्षेय । तन्मुञ्च मां त्वां शरणं प्रपन्नम्' इति । कृपालुना तेन विसृष्टः स कलिः संनिहिते तस्मिन्विभीतकवृक्षे प्रविवेश । ततः प्रभृति स वृक्षोऽमङ्गलः कलिहेतुश्च बभूव ।

एवं राहुणा निर्मुक्तश्चन्द्रमा इव कलिना निर्मुक्तो नलः पुनः सारथ्यं कुर्वन्नतिगम्भीरेण रथघोषेण दिशो मुखरयन् सन् सायाह्ने कुण्डिनं प्रविवेश । तेन रथघोषेण स्वभर्तारमागतं मन्वाना दमयन्ती संभ्रमेण प्रासादमारुह्य तदभिमुखी तस्थौ । तावदयोध्याधिपतिमायान्तं विदित्वा भीमस्तं सोपचारमानाय्य पूजयन् प्रसङ्गेन तत्समागमे हेतुं पप्रच्छ । ऋतुपर्णस्तु मनस्येवमकरोत्—'यद्यत्र स्वयंवरः प्रस्तुतः स्यात्तदा नायमेवं पृच्छेत् । न चात्र तदर्थं संनाहो राजकुले संभ्रमो राज्ञां समागमो वा दृश्यते । वयं पुनर्वटोश्वपलया गिरा वञ्चिताः कामेन च पराभवं गमिताः स्मः । अतो न युक्तमस्मदागमनं वक्तुम्' इति निश्चित्य भवन्तमभिवादयितुमागतोऽस्मीति प्रत्युत्तरं दत्तवान् । भीमोऽपि तदाकर्ण्य कथमभिवादयितुमित्याह । को हि नामैवमल्पीयसेऽर्थायातिदूरमध्वानमेकाहेनातिक्रम्यागच्छेत् । तन्नैतदेवम् । भवतु ।

Digitized by Google

क्रमेण स्पष्टीभविष्यति' इति मनसा विमृर्शंस्तथास्त्विति तं प्रत्याह। तदनु तेनान्नपानादिनोपचरित ऋतुपर्णो वार्ष्णेयेन सह सुखं सुष्वाप।

सवार्ष्णेये ऋतुपर्णे गते तद्गथ्यान् विश्रमय्य तत्समीपे स मुपविष्टं ह्रस्वबाहुं तं नलं प्रासादात्प्रेक्षमाणा दमयन्ती वितर्कयामास 'अश्रावि खलु नलस्य रथनिर्घोषः। तत्कथं कोऽपि विलक्षणः पुमान् दृश्यते। किमृतुपर्णोऽपि पुण्यश्लोक इव हयज्ञानवान् स्यात्। आहोस्विद्वाससीव लोककान्तस्य मे कान्तस्य रूपेऽप्यप्रीयमाणस्य दैवस्य किमप्येतद्विलसितं स्यात्। स्निह्यत्यस्मिन् मे मनः। प्रादुर्भवन्ति च शुभानि निमित्तानि। तदेनमेव परीक्षिष्ये' इति निश्चित्य केशिनीं नाम स्वां परिचारिकां नलान्तिकं प्राहिणोत्।

सा चैनमुवाच–'आर्य, अस्माकं स्वामिनी दमयन्ती त्वां पृच्छति के यूयम्। कच्चिदुष्माभिर्नैषधो नलो दृष्टः इति'। स तु प्रकृतं स्वं नाम वृत्तं चोक्त्वा पुनरुवाच–'भद्रे, नलस्त्वात्मनैवात्मनि निदर्शनं गतः। अतो नान्येन द्रष्टुं शक्यः' इति। तद्वाक्यं दमयन्त्यै निवेदयन्ती सा तदादेशेन पुनरेत्य पर्णादवचनमेनं श्रावयामास। तेन च तस्मिन्नेव प्रत्युत्तरे दत्ते तदावेदयन्तीं दूतीं पुनस्तच्चेष्टापरिज्ञानाय सा प्रेषयामास। सापि स्वयं किंचिदब्रुवाणैव तद्व्यापारान् पश्यन्ती पुनर्दमयन्तीमेत्य विस्मिता व्याचख्यौ 'स्वामिनि, अत्यद्भुतं खलु मया तत्र दृष्टम्। शृणु वर्णयामि। अयं बाहुकः केनचिदल्पविवरेण द्वारेणानमितशिरा असंकुचितगात्रश्चान्तः प्रविवेश। तदा तद्द्वारं प्रकाममुन्नम्य विपुलमासीत्। अयोध्याधिपतेर्भोजनार्थं प्रेषि-

Digitized by Google

तानि द्रव्याणि अग्निं जलं च स्वयमेव सृष्ट्वा तेन पपाच । तेन पाणिभ्यां मृदितानि पुष्पाणि पुनर्हसितानि भवन्ति न तु म्लायन्ति' इति । सा तु संभ्रमेण तत्पक्वमन्नं तया किंचिदानाय्य भक्षयन्ती 'हा नाथ, कथमिमामवस्थां प्रपन्नोऽसि' इति मूर्छिता निपपात । क्षणाल्लब्धसंज्ञा सेयं स्वदारकौ केशिन्या सह तदन्तिकं प्रेषयामास । नलस्तु तौ स्वपुत्रौ दोर्भ्यामादायाङ्के निधाय मुहुर्मुहुरालिङ्ग्य चिरं रुरोद । पुनश्च धैर्यमवलम्ब्य तामूचे—' अयि, ममाप्येतत्तुल्यौ दारकौ भवतः । एतद्दर्शनेन तत्स्मृतिर्बभूव । असकृदिहागच्छन्त्यां त्वयि शङ्का भवेत् । तद्गम्यताम्' इति दारकाभ्यां सह तां यापयामास ।

तच्चाकर्ण्य सा भैमी तं नलं निश्चित्य सहसा मातरमेत्य तस्यै निवेदयामास—'अम्ब, बहुशः परीक्षितोऽसौ बाहुकाख्यः पुरुषः । तव जामातुर्यदसाधारणं चेष्टितं तदेतस्मिन् सर्वं तथैव भवति । रूपमेकं वर्जयित्वा नास्त्यन्तरमस्य पुण्यश्लोकस्य च । तत्परीक्षार्थं किमहं तत्र गच्छानि, उत स इहानीयतां यत्ते मतं तत्प्रब्रूहि ' इति । सा तु सपदि भर्तुरनुमतिमवाप्य तं नलमन्तःपुरमानाययामास ।

संनिहितं नलं दमयन्ती पप्रच्छ—'अयि बाहुक, अपि जानीषे सुप्तामनन्यपरायणां धर्मपत्नीमर्धवाससा वने परित्यज्य परागतं धर्मवत्सलं निषधेश्वरम्' इति । सोऽपि तां प्रत्यूचे—'अयि धर्मज्ञे, आत्मनः कृते क्लिश्यमानाया जायाया दुःखमसहमानस्तल्लघूकरणाय तां त्यक्तवान्यदि कोऽत्रोपालम्भो भवति । का हि नाम त्वां विनान्या कुलसंपन्ना नारी शीलमुत्सृज्यैवं पुनरन्यं भर्तारं वृणुयात् '

Digitized by Google

इति । सा तु तदाकर्ण्य भीता वेपमाननतनुलता प्रोवाच—मा मां तथाविधां शङ्किष्ठाः । पर्णादवचनेन त्वामयोध्याधिपतौ सूतकर्मणा स्थितमवधार्य त्वदानयनाय मया कृतोऽयमुपायः । कोऽन्यस्त्वदृते-ऽतिदवीयसीं पदवीमेकाहेन लङ्घयितुं शक्तः । यद्यहं पापाशया स्यां तदा त्वन्तः साक्षिभूतो ममायं प्राणवायुरद्यैव मामुज्झित्वा निष्क्रामतु ' इति शपथं चक्रे । सपदि पुष्पवृष्ट्या सह समापतन्त्यामशरीरिण्यां गिरि तद्वचनमनुवदन्त्यां, गतसंदेहो नलो नागराजदत्ते वाससी पर्यधात् । तत्क्षणमाविर्भूतस्वरूपं तं 'हा नाथ' इत्यभिद्रुत्य दमयन्ती कण्ठे समाश्लिष्य रुरोद । नलोऽपि तां दयितां तौ पुत्रौ च मुहुर्मुहुरालिङ्गच रुरोद च जहर्ष च । भीमस्तु नलं प्राप्तमाकर्ण्य 'सदारं तं प्रातर्द्रष्टास्मि' इत्यनुमन्यते स्म । एवं संवत्सरत्रयादूर्ध्वं पुनः संगतौ तौ दम्पती परां निर्वृतिं प्राप्य स्वप्रवासकथासंकथनेनैव रात्रिशेषं गमयामासतुः

प्रभाते तौ दमयन्तीनलौ कृतसंस्कारौ वस्त्राभरणादिभिरलंकृतौ च सन्तौ राजानं भीममेत्य प्रणेमतुः । तेन प्रमुदितः स राजा सर्वस्मिन्नपि नगरे महोत्सवं प्रवर्तयामास । ऋतुपर्णोऽपि तन्नलागमनमाज्ञाय स्वयं प्रमना अपि व्रीडितो भूत्वा नलमाहूय तमेकान्ते सान्त्वयामास । स तावत्तत्कृतमुपकारं स्मरन् स्वयं भीतं तमाश्वास्य तस्मै अश्वहृदयं चोपदिश्य तमयोध्यायै प्रस्थापयामास ।

तदनु परिमितेन परिवारेण स्वपुरं प्राप्तो नलो देवनाय पुष्करमाह्वयते स्म । तदमृष्यमाणे सर्वस्वमेकाह्नेन पणीकृतवति पुष्करे,

Digitized by Google

प्रवृत्ते च पुनर्द्यूते, नलो जयति स्म । जितमवाङ्मुखं पुष्करमाश्वासयन्नलः प्राह—'रे रे पुष्कर, यद्यपि त्वं वधार्हचेष्टितस्तथापि भ्रातृस्नेहो मे त्वयि न विच्छिद्यते । अतस्त्वदीयं राज्यं प्राप्य स्वस्थानं याहि' इति तं प्रेषयामास । अथ पौरानाश्वास्य दमयन्त्या सहितो नलो यथापूर्वं राज्यं चक्रे । अत्र चायं श्लोको भवति :—

कर्कोटकस्य नागस्य दमयन्त्या नलस्य च ।
ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम् ॥ इति ।

इति श्रीलक्ष्मणसूरिविरचितो नलोपाख्यानसंग्रहः

समाप्तः ।

ॐ तत्सत्

Digitized by Google

॥ श्री ॥

॥ रामायणसारम् ॥

कोसलो नाम मुदितः स्फीतो जनपदो महान् ।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान् ॥ १ ॥
अयोध्या नाम नगरी तत्रासील्लोकविश्रुता ।
मनुना मानवेन्द्रेण या पुरी निर्मिता स्वयम् ॥ २ ॥
तां तु राजा दशरथो महाराष्ट्रविवर्धनः ।
पुरीमावासयामास दिवं देवपतिर्यथा ॥ ३ ॥
तस्य त्वेवंप्रभावस्य धर्मज्ञस्य महात्मनः ।
सुतार्थं तप्यमानस्य नासीद्वंशकरः सुतः ॥ ४ ॥
ततः स गत्वा ताः पत्नीर्नरेन्द्रो हृदयप्रियाः ।
उवाच दीक्षां विशत यक्ष्येऽहं सुतकारणात् ॥ ५ ॥
एतच्छ्रुत्वा रहः सूतो राजानमिदमब्रवीत् ।
सनत्कुमारो भगवान् पूर्वं कथितवान् कथाम् ॥ ६ ॥
ऋषीणां संनिधौ राजंस्तव पुत्रागमं प्रति ।
कश्यपस्य तु पुत्रोऽस्ति विभण्डक इति श्रुतः ॥ ७ ॥
ऋश्यशृङ्ग इति ख्यातस्तस्य पुत्रो भविष्यति ।
तं च राजा दशरथो यशस्कामः कृताञ्जलिः ॥ ८ ॥

Digitized by Google

ऋश्यशृङ्गं द्विजश्रेष्ठं वरयिष्यति धर्मवित् ।
धर्मार्थं प्रसवार्थं च स्वर्गार्थं च नरेश्वरः ॥ ९ ॥
लभते च स तं कामं द्विजमुख्याद्विशां पतिः ।
पुत्राश्चास्य भविष्यन्ति चत्वारोऽमितविक्रमाः ॥ १० ॥
वंशप्रतिष्ठानकराः सर्वलोकेषु विश्रुताः ।
एवं स देवप्रवरः पूर्वं कथितवान् कथाम् ॥ ११ ॥
स त्वं पुरुषशार्दूल तमानय सुसत्कृतम् ।
स्वयमेव महाराज गत्वा सबलवाहनः ॥ १२ ॥
अनुमान्य वसिष्ठं च सूतवाक्यं निशम्य च ।
सान्तःपुरः सहामात्यः प्रययौ यत्र स द्विजः ॥ १३ ॥
आसाद्य तं द्विजश्रेष्ठं रोमपादसमीपगम् ।
ऋषिपुत्रं ददर्शादौ दीप्यमानमिवानलम् ॥ १४ ॥
रोमपादेन चाख्यातमृषिपुत्राय धीमते ।
सख्यं संबन्धकं चैव तदा तं प्रत्यपूजयत् ॥ १५ ॥
एवं सुसत्कृतस्तेन सहोषित्वा नरर्षभः ।
सप्ताष्टदिवसान् राजा राजानमिदमब्रवीत् ॥ १६ ॥
शान्ता तव सुता राजन् सह भर्त्रा विशां पते ।
मदीयं नगरं यातु कार्यं हि महदुद्यतम् ॥ १७ ॥
तथेति राजा संश्रुत्य गमनं तस्य धीमतः ।
उवाच वचनं विप्रं गच्छ त्वं सह भार्यया ॥ १८ ॥

Digitized by Google

स नृपेणाभ्यनुज्ञातः प्रययौ सह भार्यया ।
ततः सुहृदमापृच्छ्य प्रस्थितो रघुनन्दनः ॥ १९ ॥
ततः स्वलंकृतं राजा नगरं प्रविवेश ह ।
शङ्खदुन्दुभिनिर्घोषैः पुरस्कृत्य द्विजर्षभम् ॥ २० ॥
अन्तःपुरं प्रवेश्यैनं पूजां कृत्वा च शास्त्रतः ।
कृतकृत्यं तदात्मानं मेने तस्योपवाहनात् ॥ २१ ॥
ततः प्रसाद्य शिरसा तं विप्रं देववर्णिनम् ।
यज्ञाय वरयामास संतानार्थं कुलस्य वै ॥ २२ ॥
तथेति च स राजानमुवाच च सुसत्कृतः ।
संभाराः संभ्रियन्तां ते तुरगश्च विमुच्यताम् ॥ २३ ॥
ततः प्रीतोऽभवद्राजा श्रुत्वा तद्द्विजभाषितम् ।
अमात्यांश्चाब्रवीद्राजा हर्षेणेदं शुभाक्षरम् ॥ २४ ॥
गुरूणां वचनाच्छीघ्रं संभाराः संभ्रियन्तु मे ।
समर्थाधिष्ठितश्चाश्वः सोपाध्यायो विमुच्यताम् ॥ २५ ॥
तथेति च ततः सर्वे मन्त्रिणः प्रत्यपूजयन् ।
पार्थिवेन्द्रस्य तद्वाक्यं यथाज्ञप्तमकुर्वत ॥ २६ ॥
ततो वसिष्ठप्रमुखाः सर्व एव द्विजोत्तमाः ।
ऋष्यशृङ्गं पुरस्कृत्य यज्ञकर्मारभंस्तदा ॥ २७ ॥
अथ संवत्सरे पूर्णे तस्मिन् प्राप्ते तुरंगमे ।
सरय्वाश्चोत्तरे तीरे राज्ञो यज्ञोऽभ्यवर्तत ॥ २८ ॥

Digitized by Google

ततः प्रक्रम्य तामिष्टिं पुत्रीयां पुत्रकारणात् ।
जुहाव चाग्नौ तेजस्वी मन्त्रदृष्टेन कर्मणा ॥ २९ ॥
ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
भागप्रतिग्रहार्थं वै समवेता यथाविधि ॥ ३० ॥
ताः समेत्य यथान्यायं तस्मिन् सदसि देवताः ।
अब्रुवन् लोककर्तारं ब्रह्माणं वचनं महत् ॥ ३१ ॥
भगवंस्त्वत्प्रसादेन रावणो नाम राक्षसः ।
सर्वान्नो बाधते वीर्याच्छासितुं तं न शक्नुमः ॥ ३२ ॥
त्वया तस्मै वरो दत्तः प्रीतेन भगवन् पुरा ।
मानयन्तश्च तं नित्यं सर्वं तस्य क्षमामहे ॥ ३३ ॥
तन्महन्नो भयं तस्माद्राक्षसाद्घोरदर्शनात् ।
वधार्थं तस्य भगवन्नुपायं कर्तुमर्हसि ॥ ३४ ॥
एवमुक्तः सुरैः सर्वैश्चिन्तयित्वा ततोऽब्रवीत् ।
हन्तायं विदितस्तस्य वधोपायो दुरात्मनः ॥ ३५ ॥
तेन गन्धर्वयक्षाणां देवदानवरक्षसाम् ।
अवध्योऽस्मीति वागुक्ता तथेत्युक्तं च तन्मया ॥ ३६ ॥
नाकीर्तयदवज्ञानात्तद्रक्षो मानुषं तदा ।
तस्मात्स मानुषाद्वध्यो मृत्युर्नान्योऽस्य विद्यते ॥ ३७ ॥
एतस्मिन्नन्तरे विष्णुरुपयातो महाद्युतिः ।
शङ्खचक्रगदापाणिः पीतवासा जगत्पतिः ॥ ३८ ॥

Digitized by Google

तमब्रुवन् सुराः सर्वे समभिष्टूय संनताः ।
राज्ञो दशरथस्य त्वमयोध्याधिपतेः प्रभोः ॥ ३९ ॥
विष्णो पुत्रत्वमागच्छ कृत्वात्मानं चतुर्विधम् ।
तत्र त्वं मानुषो भूत्वा प्रवृद्धं लोककण्टकम् ॥ ४० ॥
अवध्यं दैवतैर्विष्णो समरे जहि रावणम् ।
त्वं गतिः परमा देव सर्वेषां नः परंतप ॥ ४१ ॥
वधाय देवशत्रूणां नृणां लोके मनः कुरु ।
एवमुक्तः स देवेशो विष्णुस्त्रिदशपुंगवः ॥ ४२ ॥
अब्रवीत्त्रिदशान् सर्वान् समेतान् धर्मसंहितान् ।
भयं त्यजत भद्रं वो वधार्थं युधि रावणम् ॥ ४३ ॥
सपुत्रपौत्रं सामात्यं समित्रज्ञातिबान्धवम् ।
हत्वा क्रूरं दुरात्मानं देवर्षीणां भयावहम् ॥ ४४ ॥
दशवर्षसहस्राणि दशवर्षशतानि च ।
वत्स्यामि मानुषे लोके पालयन् पृथिवीमिमाम् ॥ ४५ ॥
एवं दत्त्वा वरं देवो देवानां विष्णुरात्मवान् ।
पितरं रोचयामास तदा दशरथं नृपम् ॥ ४६ ॥
स चाप्यपुत्रो नृपतिस्तस्मिन् काले महाद्युतिः ।
अयजत्पुत्रियामिष्टिं पुत्रेप्सुररिसूदनः ॥ ४७ ॥
स कृत्वा निश्चयं विष्णुरामन्त्र्य च पितामहम् ।
अन्तर्धानं गतो देवैः पूज्यमानो महर्षिभिः ॥ ४८ ॥

Digitized by Google

ततो वै यजमानस्य पावकादतुलप्रभम् ।
प्रादुर्भूतं महद्भूतं महावीर्यं महाबलम् ॥ ४९ ॥
दिव्यपायससंपूर्णां पात्रीं पत्नीमिव प्रियाम् ।
प्रगृह्य विपुलां दोर्भ्यां स्वयं मायामयीमिव ॥ ५० ॥
समवेक्ष्याब्रवीद्वाक्यमिदं दशरथं नृपम् ।
प्राजापत्यं नरं विद्धि मामिहाभ्यागतं नृप ॥ ५१ ॥
ततः परं तदा राजा प्रत्युवाच कृताञ्जलिः ।
भगवन् स्वागतं तेऽस्तु किमहं करवाणि ते ॥ ५२ ॥
अथो पुनरिदं वाक्यं प्राजापत्यो नरोऽब्रवीत् ।
राजन्नर्चयता देवानद्य प्राप्तमिदं त्वया ॥ ५३ ॥
इदं तु नरशार्दूल पायसं देवनिर्मितम् ।
प्रजाकरं गृहाण त्वं धन्यमारोग्यवर्धनम् ॥ ५४ ॥
भार्याणामनुरूपाणामश्नीतेति प्रयच्छ वै ।
तासु त्वं प्राप्यसे पुत्रान् यदर्थं यजसे नृप ॥ ५५ ॥
तथेति नृपतिः प्रीतः शिरसा प्रतिगृह्य ताम् ।
पात्रीं देवान्नसंपूर्णां देवदत्तां हिरण्मयीम् ॥ ५६ ॥
अभिवाद्य च तद्भूतमद्भुतं प्रियदर्शनम् ।
मुदा परमया युक्तश्चकाराभिप्रदक्षिणम् ॥ ५७ ॥
ततस्तदद्भुतप्रख्यं भूतं परमभास्वरम् ।
संवर्तयित्वा तत्कर्म तत्रैवान्तरधीयत ॥ ५८ ॥

Digitized by Google

कौसल्यायै नरपतिः पायसार्धं ददौ तदा ।
अर्धादर्धं ददौ चापि सुमित्रायै नराधिपः ॥ ५९ ॥
कैकेय्यै चावशिष्टार्धं ददौ पुत्रार्थकारणात् ।
प्रददौ चावशिष्टार्धं पायसस्यामृतोपमम् ॥ ६० ॥
अनुचिन्त्य सुमित्रायै पुनरेव महीपतिः ।
तास्त्वेवत्पायसं प्राप्य नरेन्द्रस्योत्तमाः स्त्रियः ॥ ६१ ॥
संमानं मेनिरे सर्वाः प्रहर्षोदितचेतसः ।
पुत्रत्वं तु गते विष्णौ राज्ञस्तस्य महात्मनः ॥ ६२ ॥
उवाच देवताः सर्वाः स्वयंभूर्भगवानिदम् ।
सत्यसंधस्य वीरस्य सर्वेषां नो हितैषिणः ॥ ६३ ॥
विष्णोः सहायान् बलिनः सृजध्वं कामरूपिणः ।
अप्सरःसु च मुख्यासु गन्धर्वीणां तनूषु च ॥ ६४ ॥
सृजध्वं हरिरूपेण पुत्रांस्तुल्यपराक्रमान् ।
पूर्वमेव मया सृष्टो जाम्बवान्ऋक्षपुंगवः ॥ ६५ ॥
जृम्भमाणस्य सहसा मम वक्त्रादजायत ।
ते तथोक्ता भगवता तत्प्रतिश्रुत्य शासनम् ॥ ६६ ॥
जनयामासुरेवं वै पुत्रान्वानररूपिणः ।
निर्वृत्ते तु क्रतौ तस्मिन् हयमेधे महात्मनः ॥ ६७ ॥
प्रतिगृह्य सुरा भागं प्रतिजग्मुर्यथागतम् ।
समाप्तदीक्षानियमः पत्नीगणसमन्वितः ॥ ६८ ॥

Digitized by Google

प्रविवेश पुरीं राजा सभृत्यबलवाहनः ।
उवास सुखितस्तत्र पुत्रोत्पत्तिं विचिन्तयन् ॥ ६९ ॥
ततश्च द्वादशे मासे चैत्रे नावमिके तिथौ ।
नक्षत्रेऽदितिदैवत्ये स्वोच्चसंस्थेषु पञ्चसु ॥ ७० ॥
ग्रहेषु कर्कटे लग्ने वाक्पताविन्दुना सह ।
प्रोद्यमाने जगन्नाथं सर्वलोकनमस्कृतम् ॥ ७१ ॥
कौसल्या जनयामास सर्वलक्षणसंयुतम् ।
विष्णोरर्धं महाभागं पुत्रमैक्ष्वाकवर्धनम् ॥ ७२ ॥
भरतो नाम कैकेय्यां जज्ञे सत्यपराक्रमः ।
अथ लक्ष्मणशत्रुघ्नौ सुमित्राजनयत्सुतौ ॥ ७३ ॥
पुष्ये जातस्तु भरतो मीनलग्ने प्रसन्नधीः ।
सार्पे जातौ तु सौमित्री कुलीरेऽभ्युदिते रवौ ॥ ७४ ॥
राज्ञः पुत्रा महात्मानश्चत्वारो जज्ञिरे पृथक् ।
गुणवन्तोऽनुरूपाश्च रुच्या प्रोष्ठपदोपमाः ॥ ७५ ॥
उत्सवश्च महानासीदयोध्यायां जनाकुलः ।
अतीत्यैकादशाहं तु नामकर्म तथाकरोत् ॥ ७६ ॥
ज्येष्ठं रामं महात्मानं भरतं कैकयीसुतम् ।
सौमित्रिं लक्ष्मणमिति शत्रुघ्नमपरं तथा ॥ ७७ ॥
वसिष्ठः परमप्रीतो नामानि कृतवांस्तदा ।
तेषां जन्मक्रियादीनि सर्वकर्माण्यकारयत् ॥ ॥ ७८ ॥

Digitized by Google

तेषां केतुरिव ज्येष्ठो रामो रतिकरः पितुः ।
बभूव भूयो भूतानां स्वयंभूरिव संमतः ॥ ७९ ॥

सर्वे वेदविदः शूराः सर्वे लोकहिते रताः ।
सर्वे ज्ञानोपसंपन्नाः सर्वे समुदिता गुणैः ॥ ८० ॥

तेषामपि महातेजा रामः सत्यपराक्रमः ।
इष्टः सर्वस्य लोकस्य शशाङ्क इव निर्मलः ॥ ८१ ॥

बाल्यात्प्रभृति सुस्निग्धो लक्ष्मणो लक्ष्मिवर्धनः ।
रामस्य लोकरामस्य भ्रातुर्ज्येष्ठस्य धीमतः ॥ ८२ ॥

भरतस्यापि शत्रुघ्नो लक्ष्मणावरजो हि सः ।
प्राणैः प्रियतरो नित्यं तस्य चासीत्तथा प्रियः ॥ ८३ ॥

ते चापि मनुजव्याघ्रा वैदिकाध्ययने रताः ।
पितुश्शुश्रूषणरता धनुर्वेदे च निष्ठिताः ॥ ८४ ॥

अथ राजा दशरथस्तेषां दारक्रियां प्रति ।
चिन्तयामास धर्मात्मा सोपाध्यायः सबान्धवः ॥ ८५ ॥

तस्य चिन्तयमानस्य मन्त्रिमध्ये महात्मनः ।
अभ्यागच्छन्महातेजा विश्वामित्रो महामुनिः ॥ ८६ ॥

तं दृष्ट्वा ज्वलितं दीप्ततापसं संशितव्रतम् ।
प्रहृष्टवदनो राजा ततोऽर्घ्यमुपहारयत् ॥ ८७ ॥

स राज्ञः प्रतिगृह्यार्घ्यं शास्त्रदृष्टेन कर्मणा ।
कुशलं चाव्ययं चैव पर्यपृच्छन्नराधिपम् ॥ ८८ ॥

Digitized by Google

अथ हृष्टमना राजा विश्वामित्रं महामुनिम् ।
उवाच परमोदारो हृष्टस्तमभिपूजयन् ॥ ८९ ॥
अद्य मे सफलं जन्म जीवितं च सुजीवितम् ।
ब्रूहि यत्प्रार्थितं तुभ्यं कार्यमागमनं प्रति ॥ ९० ॥
कार्यस्य न विमर्शं च गन्तुमर्हसि कौशिक ।
कर्ता चाहमशेषेण दैवतं हि भवान्मम ॥ ९१ ॥
तच्छ्रुत्वा राजसिंहस्य वाक्यमद्भुतविस्तरम् ।
हृष्टरोमा महातेजा विश्वामित्रोऽभ्यभाषत ॥ ९२ ॥
सदृशं राजशार्दूल तवैतद्भुवि नान्यथा ।
महावंशप्रसूतस्य वसिष्ठव्यपदेशिनः ॥ ९३ ॥
यत्तु मे हृद्गतं वाक्यं तस्य कार्यस्य निश्चयम् ।
कुरुष्व राजशार्दूल भव सत्यप्रतिश्रवः ॥ ९४ ॥
अहं नियममातिष्ठे सिद्ध्यर्थं पुरुषर्षभ ।
तस्य विघ्नकरौ द्वौ तु राक्षसौ कामरूपिणौ ॥ ९५ ॥
न च मे क्रोधमुत्स्रष्टुं बुद्धिर्भवति पार्थिव ।
तथाभूता हि सा चर्या न शापस्तत्र मुच्यते ॥ ९६ ॥
स्वपुत्रं राजशार्दूल रामं सत्यपराक्रमम् ।
काकपक्षधरं शूरं ज्येष्ठं मे दातुमर्हसि ॥ ९७ ॥
शक्तो ह्येष मया गुप्तो दिव्येन स्वेन तेजसा ।
राक्षसा ये विकर्तारस्तेषामपि विनाशने ॥ ९८ ॥

Digitized by Google

श्रेयश्चास्मै प्रदास्यामि बहुरूपं न संशयः ।
न च तौ राममासाद्य शक्तौ स्थातुं कथंचन ॥ ९९ ॥
अभिप्रेतमसंसक्तमात्मजं दातुमर्हसि ।
दशरात्रं हि यज्ञस्य रामं राजीवलोचनम् ॥ १०० ॥
तच्छ्रुत्वा राजशार्दूलो विश्वामित्रस्य भाषितम् ।
मुहूर्तमिव निःसंज्ञः संज्ञावानिदमब्रवीत् ॥ १०१ ॥
किंवीर्या राक्षसास्ते च कस्य पुत्राश्च के च ते ।
कथंप्रमाणाः के चैतान् रक्षन्ति मुनिपुंगव ॥ १०२ ॥
कथं च प्रतिकर्तव्यं तेषां रामेण रक्षसाम् ।
तस्य तद्वचनं श्रुत्वा विश्वामित्रोऽभ्यभाषत ॥ १०३ ॥
पौलस्त्यवंशप्रभवो रावणो नाम राक्षसः ।
स ब्रह्मणा दत्तवरस्त्रैलोक्यं बाधते भृशम् ॥ १०४ ॥
तेन संचोदितौ द्वौ तु राक्षसौ सुमहाबलौ ।
मारीचश्च सुबाहुश्च यज्ञविघ्नं करिष्यतः ॥ १०५ ॥
इत्युक्ते मुनिना तेन राजोवाच मुनिं तदा ।
कथमप्यमरप्रख्यं संग्रामाणामकोविदम् ॥ १०६ ॥
बालं मे तनयं ब्रह्मन्नैव दास्यामि पुत्रकम् ।
तच्छ्रुत्वा वचनं तस्य स्नेहपर्याकुलाक्षरम् ॥ १०७ ॥
समन्युः कौशिको वाक्यं प्रत्युवाच महीपतिम् ।
पूर्वमर्थं प्रतिज्ञाय प्रतिज्ञां हातुमिच्छसि ॥ १०८ ॥

Digitized by Google

राघवाणामयुक्तोऽयं कुलस्यास्य विपर्ययः ।
यदिदं ते क्षमं राजन् गमिष्यामि यथागतम् ॥ १०९ ॥
मिथ्याप्रतिज्ञः काकुत्स्थ सुखी भव सबान्धवः ।
तस्य रोषपरीतस्य विश्वामित्रस्य धीमतः ॥ ११० ॥
चचाल वसुधा कृत्स्ना विवेश च भयं सुरान् ।
त्रस्तरूपं तु विज्ञाय जगत्सर्वं महानृषिः ॥ १११ ॥
नृपतिं सुव्रतो धीरो वसिष्ठो वाक्यमब्रवीत् ।
कृतास्त्रमकृतास्त्रं वा नैनं शक्ष्यन्ति राक्षसाः ॥ ११२ ॥
गुप्तं कुशिकपुत्रेण ज्वलनेनामृतं यथा ।
तेषां निग्रहणे शक्तः स्वयं च कुशिकात्मजः ॥ ११३ ॥
तव पुत्रहितार्थाय त्वामुपेत्याभियाचते ।
तथा वसिष्ठे ब्रुवति राजा दशरथः सुतम् ॥ ११४ ॥
प्रहृष्टवदनो राममाजुहाव सलक्ष्मणम् ।
स पुत्रं मूर्ध्न्युपाघ्राय राजा दशरथः प्रियम् ॥ ११५
ददौ कुशिकपुत्राय संप्रीतेनान्तरात्मना ।
विश्वामित्रो ययावग्रे ततो रामो धनुर्धरः ॥ ११६ ॥
काकपक्षधरो धन्वी तं च सौमित्रिरन्वगात् ।
अध्यर्धयोजनं गत्वा सरय्वा दक्षिणे तटे ॥ ११७ ॥
रामेति मधुरां वाणीं विश्वामित्रोऽभ्यभाषत ।
मन्त्रग्रामं गृहाण त्वं बलामतिबलां तथा ॥ ११८ ॥

Digitized by Google

एतद्विद्याद्वये प्राप्ते भविता नास्ति ते समः ।
प्रदातुं त्वयि काकुत्स्थ सदृशस्त्वं हि धार्मिक ॥ ११९ ॥
ततो रामो जलं स्पृष्ट्वा प्रहृष्टवदनः शुचिः ।
प्रतिजग्राह ते विद्ये महर्षेर्भावितात्मनः ॥ १२० ॥
विद्यासमुदितो रामः शुशुभे भूरिविक्रमः ।
सहस्ररश्मिर्भगवान् शरदीव दिवाकरः ॥ १२१ ॥
गुरुकार्याणि सर्वाणि नियुज्य कुशिकात्मजे ।
ऊषुस्तां रजनीं तीरे सरय्वाः सुसुखं त्रयः ॥ १२२ ॥
प्रभातायां तु शर्वर्यां विश्वामित्रो महामुनिः ।
अभ्यभाषत काकुत्स्थौ शयानौ पर्णसंस्तरे ॥ १२३ ॥
कौसल्या सुप्रजा राम पूर्वा संध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥ १२४ ॥
तस्यर्षेः परमोदारं वचः श्रुत्वा नृपात्मजौ ।
स्नात्वा कृतोदकौ वीरौ जेपतुः परमं जपम् ॥ १२५ ॥
कृताह्निकौ महावीर्यौ विश्वामित्रं तपोधनम् ।
अभिवाद्याभिसंहृष्टौ गमनायाभितस्थतुः ॥ १२६ ॥
तौ प्रयातौ महावीर्यौ दिव्यां त्रिपथगां नदीम् ।
ददृशाते ततस्तत्र सरय्वाः संगमे शुभे ॥ १२७ ॥
तत्राश्रमपदं पुण्यमृषीणामुग्रतेजसाम् ।
ऊचतुस्तौ महात्मानं विश्वामित्रमिदं वचः ॥ १२८ ॥

Digitized by Google

कस्यायमाश्रमः पुण्यः को न्वस्मिन्वसते पुमान् ।
तयोस्तद्वचनं श्रुत्वा प्रहस्य मुनिपुंगवः ॥ १२९ ॥
अब्रवीच्छ्रूयतां राम यस्यायं पूर्व आश्रमः ।
कंदर्पो मूर्तिमानासीत्काम इत्युच्यते बुधैः ॥ १३० ॥
तपस्यन्तमिह स्थाणुं नियमेन समाहितम् ।
धर्षयामास दुर्मेधा हुंकृतश्च महात्मना ॥ १३१ ॥
अवदग्धस्य रौद्रेण चक्षुषा रघुनन्दन ।
व्यशीर्यन्त शरीरात्स्वात्सर्वगात्राणि दुर्मतेः ॥ १३२ ॥
अनङ्ग इति विख्यातस्तदाप्रभृति राघव ।
स चाङ्गविषयः श्रीमान् यत्राङ्गं प्रमुमोच ह ॥ १३३ ॥
तस्यायमाश्रमः पुण्यस्तस्येमे मुनयः पुरा ।
शिष्या धर्मपरा नित्यं तेषां पापं न विद्यते ॥ १३४ ॥
इहाद्य रजनीं राम वसेम शुभदर्शन ।
पुण्ययोः सरितोर्मध्ये श्वस्तरिष्यामहे वयम् ॥ १३५ ॥
तेषां संवदतां तत्र तपोदीर्घेण चक्षुषा ।
विज्ञाय परमप्रीता मुनयो हर्षमागमन् ॥ १३६ ॥
अर्घ्यं पाद्यं तथातिथ्यं निवेद्य कुशिकात्मजे ।
रामलक्ष्मणयोः पश्चादकुर्वन्नातिथिक्रियाम् ॥ १३७ ॥
न्यवसन् सुसुखं तत्र कामाश्रमपदे तदा ।
ततः प्रभाते विमले कृताह्निकमरिंदमौ ॥ १३८ ॥

Digitized by Google

विश्वामित्रं पुरस्कृत्य नद्यास्तीरमुपागतौ ।
ततार सहितस्ताभ्यां सरितं सागरंगमाम् ॥ १३९ ॥
स वनं घोरसंकाशं दृष्ट्वा नृपवरात्मजः ।
अविप्रहतमैक्ष्वाकः पप्रच्छ मुनिपुंगवम् ॥ १४० ॥
अहो वनमिदं दुर्गं झिल्लिकागणनादितम् ।
संकीर्णं बदरीभिश्च किं न्वेतद्दारुणं वनम् ॥ १४१ ॥
तमुवाच महातेजा विश्वामित्रो महामुनिः ।
एतौ जनपदौ स्फीतौ दीर्घकालमरिंदम ॥ १४२ ॥
मलदाश्च करूशाश्च मुदिता धनधान्यतः ।
कस्यचित्त्वथ कालस्य यक्षी वै कामरूपिणी ॥ १४३ ॥
बलं नागसहस्रस्य धारयन्ती तदा ह्यभूत् ।
ताटका नाम भद्रं ते भार्या सुन्दस्य धीमतः ॥ १४४ ॥
मारीचो राक्षसः पुत्रो यस्याः शक्रपराक्रमः ।
राक्षसो भैरवाकारो नित्यं त्रासयते प्रजाः ॥ १४५ ॥
इमौ जनपदौ नित्यं विनाशयति राघव ।
मलदांश्च करूशांश्च ताटका दुष्टचारिणी ॥ १४६ ॥
स्वयं पन्थानमावार्य वसत्यध्यर्धयोजने ।
स्वबाहुबलमाश्रित्य जहीमां दुष्टचारिणीम् ॥ १४७ ॥
मुनेर्वचनमक्लीबं श्रुत्वा नरवरात्मजः ।
राघवः प्राञ्जलिर्भूत्वा प्रत्युवाच दृढव्रतः ॥ १४८ ॥

Digitized by Google

करिष्यामि न संदेहस्ताटकावधमुत्तमम् ।
एवमुक्त्वा धनुर्मध्ये बद्ध्वा मुष्टिमरिंदमः ॥ १४९ ॥
ज्याशब्दमकरोत्तीव्रं दिशः शब्देन नादयन् ।
तं शब्दमभिनिध्याय राक्षसी क्रोधमूर्छिता ॥ १५० ॥
श्रुत्वा चाभ्यद्रवद्वेगाद्यतः शब्दो विनिःसृतः ।
तां दृष्ट्वा राघवः क्रुद्धां विकृतां विकृताननाम् ॥ १५१ ॥
शरेणोरसि विव्याध सा पपात ममार च ।
ततो मुनिवरः प्रीतस्ताटकावधतोषितः ॥ १५२ ॥
मूर्ध्नि राममुपाघ्राय इदं वचनमब्रवीत् ।
इहाद्य रजनीं राम वसेम शुभदर्शन ॥ १५३ ॥
विश्वामित्रवचः श्रुत्वा हृष्टो दशरथात्मजः ।
उवास रजनीं तत्र ताटकाया वने सुखम् ॥ १५४ ॥
अथ तां रजनीमुष्य विश्वामित्रो महायशाः ।
स्थितस्तु प्राङ्मुखो भूत्वा शुचिर्मुनिवरस्तदा ॥ १५५ ॥
ददौ रामाय सुप्रीतो मन्त्रग्राममनुत्तमम् ।
सर्वसंग्रहणं येषां दैवतैरपि दुर्लभम् ॥ १५६ ॥
तान्यस्त्राणि तदा विप्रो राघवाय न्यवेदयत् ।
उपतस्थुर्महार्हाणि सर्वाण्यस्त्राणि राघवम् ॥ १५७ ॥
ऊचुश्च मुदिताः सर्वे रामं प्राञ्जलयस्तदा ।
इमे स्म परमोदाराः किंकरास्तव राघव ॥ १५८ ॥

Digitized by Google

प्रतिगृह्य च काकुत्स्थः समालभ्य च पाणिना ।
मानसा मे भविष्यध्वमिति तानभ्यचोदयत् ॥ १५९ ॥
अथ ते राममामन्त्र्य कृत्वा चापि प्रदक्षिणम् ।
एवमस्त्विति काकुत्स्थमुक्त्वा जग्मुर्यथागतम् ॥ १६० ॥
स च तान् राघवो ज्ञात्वा विश्वामित्रं महामुनिम् ।
गच्छन्नेवाथ मधुरं श्लक्ष्णं वचनमब्रवीत ॥ १६१ ॥
किं वैतन्मेघसंकाशं पर्वतस्याविदूरतः ।
वृक्षषण्डमितो भाति परं कौतूहलं हि मे ॥ १६२ ॥
भगवंस्तस्य को देशो यत्र सा तव याज्ञिकी ।
रक्षितव्या क्रिया ब्रह्मन्मया वध्याश्च राक्षसाः ॥ १६३ ॥
अथ तस्याप्रमेयस्य तद्वनं परिपृच्छतः ।
विश्वामित्रो महातेजा व्याख्यातुमुपचक्रमे ॥ १६४ ॥
एष पूर्वाश्रमो राम वामनस्य महात्मनः ।
सिद्धाश्रम इति ख्यातः सिद्धो ह्यत्र महातपाः ॥ १६५ ॥
एतस्मिन्नेव काले तु राजा वैरोचनिर्बलिः ।
निर्जित्य दैवतगणान् सेन्द्रांश्च समरुद्गणान् ॥ १६६ ॥
कारयामास तद्राज्यं त्रिषु लोकेषु विश्रुतः ।
अथ विष्णुर्महातेजा अदित्यां समजायत ॥ १६७ ॥
वामनं रूपमास्थाय वैरोचनिमुपागमत् ।
त्रीन् क्रमानथ भिक्षित्वा प्रतिगृह्य च वामनः ॥ १६८ ॥

Digitized by Google

आक्रम्य लोकान् लोकात्मा सर्वभूतहिते रतः ।
महेन्द्राय पुनः प्रादान्नियम्य बलिमोजसा ॥ १६९ ॥
तेनैष पूर्वमाक्रान्त आश्रमः श्रमनाशनः ।
मयापि भक्त्या तस्यैष वामनस्योपभुज्यते ॥ १७० ॥
एतमाश्रममायान्ति राक्षसा विघ्नकारिणः ।
अत्र ते पुरुषव्याघ्र हन्तव्या दुष्टचारिणः ॥ १७१ ॥
प्राञ्जली मुनिशार्दूलमूचतू रघुनन्दनौ ।
अद्यैव दीक्षां प्रविश भद्रं ते मुनिपुंगव ॥ १७२ ॥
एवमुक्तो महातेजा विश्वामित्रो महानृषिः ।
प्रविवेश ततो दीक्षां नियतो नियतेन्द्रियः ॥ १७३ ॥
अथ तौ देशकालज्ञौ राजपुत्रावरिंदमौ ।
अनिद्रौ षडहोरात्रं तपोवनमरक्षताम् ॥ १७४ ॥
अथ काले गते तस्मिन् षष्ठेऽहनि समागते ।
आकाशे च महान् शब्दः प्रादुरासीद्भयानकः ॥ १७५ ॥
तथा मायां विकुर्वाणौ राक्षसावभ्यधावताम् ।
मारीचश्च सुबाहुश्च तयोरनुचराश्च ये ॥ १७६ ॥
आगम्य भीमसंकाशा रुधिरौघमवासृजन् ।
तावापतन्तौ सहसा दृष्ट्वा राजीवलोचनः ॥ १७७ ॥
मानवं परमोदारमस्त्रं परमभास्वरम् ।
चिक्षेप परमक्रुद्धो मारीचोरसि राघवः ॥ १७८ ॥

Digitized by Google

स तेन परमास्त्रेण मानवेन समाहितः ।
संपूर्णं योजनशतं क्षिप्तः सागरसंप्लवे ॥ १७९ ॥

संगृह्यास्त्रं ततो रामो दिव्यमाग्नेयमद्भुतम् ।
सुबाहूरसि चिक्षेप स विद्धः प्रापतद्भुवि ॥ १८० ॥

शेषान्वायव्यमादाय निजघान महायशाः ।
राघवः परमोदारो मुनीनां मुदमावहन् ॥ १८१ ॥

अथ यज्ञे समाप्ते तु विश्वामित्रो महामुनिः ।
निरीतिका दिशो दृष्ट्वा काकुत्स्थमिदमब्रवीत् ॥ १८२ ॥

मैथिलस्य नरश्रेष्ठ जनकस्य भविष्यति ।
यज्ञः परमधर्मिष्ठस्तत्र यास्यामहे वयम् ॥ १८३ ॥

त्वं चैव नरशार्दूल सहास्माभिर्गमिष्यसि ।
अद्भुतं धनुरत्नं च तत्र तद्रष्टुमर्हसि ॥ १८४ ॥

एवमुक्त्वा मुनिवरः प्रस्थानमकरोत्तदा ।
सर्षिसंघः सकाकुत्स्थ आमन्त्र्य वनदेवताः ॥ १८५ ॥

ते गत्वा दूरमध्वानं गतेऽर्धदिवसे तदा ।
जाह्नवीं सरितां श्रेष्ठां ददृशुर्मुनिसेविताम् ॥ १८६ ॥

तत्र स्नात्वा यथान्यायं संतर्प्य पितृदेवताः ।
विविशुर्जाह्नवीतीरे शुचौ मुदितमानसाः ॥ १८७ ॥

ततः प्रभाते विमले विश्वामित्रं महामुनिम् ।
उवाच राघवो वाक्यं कृताह्निकमरिंदमः ॥ १८८ ॥

Digitized by Google

तराम सरितां श्रेष्ठां पुण्यां त्रिपथगां नदीम् ।
तस्य तद्वचनं श्रुत्वा राघवस्य महात्मनः ॥ १८९ ॥
संतारं कारयामास सर्षिसंघः सराघवः ।
ततो मुनिवरस्तूर्णं जगाम सहराघवः ॥ १९० ॥
मिथिलोपवने तत्र आश्रमं दृश्य राघवः ।
पुराणं निर्जनं रम्यं पप्रच्छ मुनिपुंगवम् ॥ १९१ ॥
श्रीमदाश्रमसंकाशं किं न्विदं मुनिवर्जितम् ।
प्रत्युवाच महातेजा विश्वामित्रो महामुनिः ॥ १९२ ॥
गौतमस्य नरश्रेष्ठ पूर्वमासीन्महात्मनः ।
आश्रमो दिव्यसंकाशः सुरैरपि सुपूजितः ॥ १९३ ॥
स चेह तप आतिष्ठदहल्यासहितः पुरा ।
तस्यान्तरं विदित्वा तु सहस्राक्षः शचीपतिः ॥ १९४ ॥
मुनिवेषधरोऽहल्यामिदं वचनमब्रवीत् ।
संगमं त्वहमिच्छामि त्वया सह सुमध्यमे ॥ १९५ ॥
मुनिवेषं सहस्राक्षं विज्ञाय रघुनन्दन ।
मतिं चकार दुर्मेधा देवराजकुतूहलात् ॥ १९६ ॥
एवं संगम्य तु तया निश्चक्रामाथ जारवत् ।
अथ दृष्ट्वा सहस्राक्षं मुनिवेषधरं मुनिः ॥ १९७ ॥
मम रूपं समास्थाय कृतवानसि दुर्मते ।
अकर्तव्यमिदं तस्माद्विफलस्त्वं भविष्यति ॥ १९८ ॥

Digitized by Google

तथा शप्त्वा स वै शक्रमहल्यामपि शप्तवान् ।
अदृश्या सर्वभूतानामाश्रमेऽस्मिन्निवत्स्यसि ॥ १९९ ॥

यदा चैतद्वनं घोरं रामो दशरथात्मजः ।
आगमिष्यति दुर्धर्षस्तदा पूता भविष्यसि ॥ २०० ॥

एवमुक्त्वा महातेजो गौतमो दुष्टचारिणीम् ।
हिमवच्छिखरे पुण्ये तपस्तेपे महातपाः ॥ २०१ ॥

विश्वामित्रवचः श्रुत्वा राघवः सहलक्ष्मणः ।
विश्वामित्रं पुरस्कृत्य तमाश्रममथाविशत् ॥ २०२ ॥

ददर्श च महाभागां तपसा द्योतितप्रभाम् ।
सा हि गौतमवाक्येन दुर्निरीक्ष्या बभूव ह ॥ २०३ ॥

शापस्यान्तमुपागम्य तेषां दर्शनमागता ।
राघवौ तु ततस्तस्याः पादौ जगृहतुस्तदा ॥ २०४ ॥

स्मरन्ती गौतमवचः प्रतिजग्राह सा च तौ ।
गौतमोऽपि महातेजा अहल्यासहितः सुखी ॥ २०५ ॥

रामं संपूज्य विधिवत्तपस्तेपे महातपाः ।
रामोऽपि परमां पूजां गौतमस्य महामुनेः ॥ २०६ ॥

सकाशाद्विधिवत्प्राप्य जगाम मिथिलां ततः ।
विश्वामित्रं पुरस्कृत्य यज्ञवाटमुपागमत् ॥ २०७ ॥

विश्वामित्रमनुप्राप्तं श्रुत्वा स नृपतिस्तदा ।
प्रत्युज्जगाम सहसा विनयेन समन्वितः ॥ २०८ ॥

Digitized by Google

ऋत्विजोऽपि महात्मानस्त्वर्घ्यमादाय सत्वरम् ।
विश्वामित्राय धर्मेण ददुर्मन्त्रपुरस्कृतम् ॥ २०९ ॥

अथ राजा मुनिश्रेष्ठं कृताञ्जलिरभाषत ।
धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे मुनिपुंगव ॥ २१० ॥

यज्ञोपसदनं ब्रह्मन् प्राप्तोऽसि मुनिभिः सह ।
इत्युक्त्वा मुनिशार्दूलं प्रहृष्टवदनस्तदा ॥ २११ ॥

पुनस्तं परिपप्रच्छ प्राञ्जलिः प्रणतो नृपः ।
इमौ कुमारौ भद्रं ते देवतुल्यपराक्रमौ ॥ २१२ ॥

काकपक्षधरौ वीरौ श्रोतुमिच्छामि तत्त्वतः ।
तस्य तद्वचनं श्रुत्वा जनकस्य महात्मनः ॥ २१३ ॥

न्यवेदयन्महात्मानौ पुत्रौ दशरथस्य तौ ।
सिद्धाश्रमनिवासं च राक्षसानां वधं तथा ॥ २१४ ॥

अहल्यादर्शनं चैव गौतमेन समागमम् ।
महाधनुषि जिज्ञासां कर्तुमागमनं तथा ॥ २१५ ॥

एतत्सर्वं महातेजा जनकाय महात्मने ।
निवेद्य विररामाथ विश्वामित्रो महामुनिः ॥ २१६ ॥

तस्य तद्वचनं श्रुत्वा विश्वामित्रस्य धीमतः ।
गौतमस्य सुतो ज्येष्ठस्तपसा द्योतितप्रभः ॥ २१७ ॥

शतानन्दो मुनिश्रेष्ठं विश्वामित्रमथाब्रवीत् ।
अपि ते मुनिशार्दूल मम माता यशस्विनी ॥ २१८ ॥

Digitized by Google

दर्शिता राजपुत्राय तपो दीर्घमुपागता ।
अपि कौशिक भद्रं ते गुरुणा मम संगता ॥ २१९ ॥
तच्छ्रुत्वा वचनं तस्य विश्वामित्रो महामुनिः ।
प्रत्युवाच शतानन्दं वाक्यज्ञो वाक्यकोविदम् ॥ २२० ॥
नातिक्रान्तं मुनिश्रेष्ठ यत्कर्तव्यं कृतं मया ।
संगता मुनिना पत्नी भार्गवेणेव रेणुका ॥ २२१ ॥
तच्छ्रुत्वा वचनं तस्य विश्वामित्रस्य भाषितम् ।
शतानन्दो महातेजा रामं वचनमब्रवीत् ॥ २२२ ॥
स्वागतं ते नरश्रेष्ठ दिष्ट्या प्राप्तोऽसि राघव ।
विश्वामित्रं पुरस्कृत्य महर्षिमपराजितम् ॥ २२३ ॥
नास्ति धन्यतरो राम त्वत्तोऽन्यो भुवि कश्चन ।
गोप्ता कुशिकपुत्रस्ते येन तप्तं महत्तपः ॥ २२४ ॥
एवमुक्त्वा महातेजा विरराम द्विजोत्तमः ।
जनकः प्राञ्जलिर्वाक्यमुवाच कुशिकात्मजम् ॥ २२५ ॥
भवानाज्ञापयतु मामाज्ञाप्यो भवता ह्यहम् ।
एवमुक्तः स धर्मात्मा जनकेन महात्मना ॥ २२६ ॥
प्रत्युवाच मुनिर्वीरं वाक्यं वाक्यविशारदः ।
पुत्रौ दशरथस्येमौ क्षत्रियौ लोकविश्रुतौ ॥ २२७ ॥
द्रष्टुकामौ धनुःश्रेष्ठं यदेतत्त्वयि तिष्ठति ।
एवमुक्तस्तु जनकः प्रत्युवाच महामुनिम् ॥ २२८ ॥

Digitized by Google

तदेतद्देवदेवस्य धनूरत्नं महात्मनः ।
न्यासभूतं तदा न्यस्तमस्माकं पूर्वके विभौ ॥ २२९ ॥

अथ मे कृषतः क्षेत्रं लाङ्गलादुत्थिता मया ।
क्षेत्रं शोधयता लब्धा नाम्ना सीतेति विश्रुता ॥ २३० ॥
वीर्यशुल्केति मे कन्या स्थापितेयमयोनिजा ।
ततः सर्वे नृपतयः समेत्य मुनिपुंगव ॥ २३१ ॥

न शेकुर्ग्रहणे तस्य धनुषस्तोलनेऽपि वा ।
तदेतन्मुनिशार्दूल धनुः परमभास्वरम् ॥ २३२ ॥
रामलक्ष्मणयोश्चापि दर्शयिष्यामि सुव्रत ।
यद्यस्य धनुषो रामः कुर्यादारोपणं मुने ॥ २३३ ॥

सुतामयोनिजां सीतां दद्यां दाशरथेरहम् ।
जनकस्य वचः श्रुत्वा विश्वामित्रो महामुनिः ॥ २३४ ॥

धनुर्दर्शय रामाय इति होवाच पार्थिवम् ।
जनकेन समादिष्टाः सचिवाः प्राविशन् पुरीम् ॥ २३५ ॥
तद्धनुः पुरतः कृत्वा निर्जग्मुः पार्थिवाज्ञया ।
इदं धनुर्वरं ब्रह्मन् जनकैरभिपूजितम् ॥ २३६ ॥

दर्शयैतन्महाभाग अनयो राजपुत्रयोः ।
विश्वामित्रस्तु धर्मात्मा श्रुत्वा जनकभाषितम् ॥ २३७ ॥

वत्स राम धनुः पश्य इति राघवमब्रवीत् ।
लीलया स धनुर्मध्ये जग्राह वचनान्मुनेः ॥ २३८ ॥

Digitized by Google

पश्यतां नृसहस्राणां बहूनां रघुनन्दनः ।
आरोपयित्वा धर्मात्मा पूरयामास तद्धनुः ॥ २३९ ॥

तद्बभञ्ज धनुर्मध्ये नरश्रेष्ठो महायशाः ।
तस्य शब्दो महानासीन्निर्घातसमनिस्वनः ॥ २४० ॥

निपेतुश्च नराः सर्वे तेन शब्देन मोहिताः ।
प्रत्याश्वस्ते जने तस्मिन् राजा विगतसाध्वसः ॥ २४१ ॥

उवाच प्राञ्जलिर्वाक्यं वाक्यज्ञो मुनिपुंगवम् ।
भगवन्दृष्टवीर्यो मे रामो दशरथात्मजः ॥ १४२ ॥

मम सत्या प्रतिज्ञा च वीर्यशुल्केति कौशिक ।
सीता प्राणैर्बहुमता देया रामाय मे सुता ॥ २४३ ॥

भवतोऽनुमते ब्रह्मन् शीघ्रं गच्छन्तु मन्त्रिणः ।
मम कौशिक भद्रं ते अयोध्यां त्वरिता रथैः ॥ २४४ ॥

राजानं प्राश्रितैर्वाक्यैरानयन्तु पुरं मम ।
प्रदानं वीर्यशुल्कायाः कथयन्तु च सर्वशः ॥ २४५ ॥

कौशिकश्च तथेत्याह राजा चाभाष्य मन्त्रिणः ।
अयोध्यां प्रेषयामास धर्मात्मा कृतशासनान् ॥ २४६ ॥

जनकेन समादिष्टा दूतास्ते क्लान्तवाहनाः ।
त्रिरात्रमुषिता मार्गे तेऽयोध्यां प्राविशन् पुरीम् ॥ २४७

ददृशुर्देवसंकाशं वृद्धं दशरथं नृपम् ।
राजानं प्रयता वाक्यमब्रुवन्मधुराक्षरम् ॥ २४८ ।

Digitized by Google

पृष्ट्वा कुशलमव्यग्रं वैदेहो मिथिलाधिपः ।
कौशिकानुमते वाक्यं भवन्तमिदमब्रवीत् ॥ २४९ ॥
पूर्वं प्रतिज्ञा विदिता वीर्यशुल्का ममात्मजा ।
सेयं मम सुता राजन् विश्वामित्रपुरःसरैः ॥ २५० ॥
यदृच्छयागतैर्वीरैर्निर्जिता तव पुत्रकैः ।
तच्च राजन् धनुर्दिव्यं मध्ये भग्नं महात्मना ॥ २५१ ॥
रामेण हि महाराज महत्यां जनसंसदि ।
अस्मै देया मया सीता वीर्यशुल्का महात्मने ॥ २५२ ॥
प्रतिज्ञां कर्तुमिच्छामि तदनुज्ञातुमर्हसि ।
शीघ्रमागच्छ भद्रं ते द्रष्टुमर्हसि राघवौ ॥ २५३ ॥
दूतवाक्यं तु तच्छ्रुत्वा राजा परमहर्षितः ।
वसिष्ठं वामदेवं च मन्त्रिणोऽन्यांश्च सोऽब्रवीत् ॥ २५४ ॥
यदि वो रोचते वृत्तं जनकस्य महात्मनः ।
पुरीं गच्छमाहे शीघ्रं मा भूत्कालस्य पर्ययः ॥ २५५ ॥
मन्त्रिणो बाढमित्याहुः सह सर्वैर्महर्षिभिः ।
सुप्रीतश्चाब्रवीद्राजा श्वो यात्रेति स मन्त्रिणः ॥ २५६ ॥
ततो रात्र्यां व्यतीतायां सोपाध्यायः सबान्धवः ।
गत्वा चतुरहं मार्गं विदेहानभ्युपेयिवान् ॥ २५७ ॥
राजा तु जनकः श्रीमान् श्रुत्वा पूजामकल्पयत् ।
राजा च राघवौ पुत्रौ निशाम्य परिहर्षितः ॥ २५८ ॥

Digitized by Google

उवास परमप्रीतो जनकेन सुपूजितः ।
ततः प्रभाते जनकः कृतकर्मा महर्षिभिः ॥ २५९ ॥
उवाच वाक्यं वाक्यज्ञः शतानन्दं पुरोहितम् ।
भ्राता मम महातेजा यवीयानतिधार्मिकः ॥ २६० ॥
तमहं द्रष्टुमिच्छामि यज्ञगोप्ता स मे मतः ।
आज्ञयाथ नरेन्द्रस्य आजगाम कुशध्वजः ॥ २६१ ॥
उपविष्टावुभौ तौ तु भ्रातरावमितौजसौ ।
प्रेषयामासतुर्वीरौ मन्त्रिश्रेष्ठं सुदामनम् ॥ २६२ ॥
गच्छ मन्त्रिपते शीघ्रमैक्ष्वाकममितप्रभम् ।
आत्मजैः सह दुर्धर्षमानयस्व समन्त्रिणम् ॥ २६३ ॥
औपकार्यं स गत्वा तु रघूणां कुलवर्धनम् ।
ददर्श शिरसा चैनमभिवाद्येदमब्रवीत् ॥ २६४ ॥
मन्त्रिश्रेष्ठवचः श्रुत्वा राजा सर्षिगणस्तदा ।
सबन्धुरगमत्तत्र जनको यत्र वर्तते ॥ २६५ ॥
वाक्यं वाक्यविदां श्रेष्ठो वैदेहमिदमब्रवीत् ।
एष वक्ष्यति धर्मात्मा वसिष्ठो मे यथाक्रमम् ॥ २६६ ॥
तूष्णींभूते दशरथे वसिष्ठो भगवान्ऋषिः ।
उवाच वाक्यं वाक्यज्ञो वैदेहं सपुरोधसम् ॥ २६७ ॥
रामलक्ष्मणयोरर्थे त्वत्सुते वरये नृप ।
सदृशाभ्यां नरश्रेष्ठ सदृशे दातुमर्हसि ॥ २६८ ॥

Digitized by Google

एवं ब्रुवाणं जनकः प्रत्युवाच कृताञ्जलिः ।
ददामि परमप्रीतो वध्वौ ते मुनिपुंगव ॥ २६९ ॥
सीतां रामाय भद्रं ते ऊर्मिलां लक्ष्मणाय च ।
तमुक्तवन्तं वैदेहं विश्वामित्रो महामुनिः ॥ २७० ॥
उवाच वचनं वीरो वसिष्ठसहितो नृपम् ।
भ्राता यवीयान् धर्मज्ञ एष राजा कुशध्वजः ॥ २७१ ॥
अस्य धर्मात्मनो राजन् रूपेणाप्रतिमं भुवि ।
सुताद्वयं नरश्रेष्ठ पत्न्यर्थं वरयामहे ॥ २७२ ॥
भरतस्य कुमारस्य शत्रुघ्नस्य च धीमतः ।
विश्वामित्रवचः श्रुत्वा वसिष्ठस्य मते तदा ॥ २७३ ॥
जनकः प्राञ्जलिर्वाक्यमुवाच मुनिपुंगवौ ।
एवं भवतु भद्रं वः कुशध्वजसुते इमे ॥ २७४ ॥
पत्न्यौ भजेतां सहितौ शत्रुघ्नभरतावुभौ ।
तमापृच्छ्य नरपती राजा दशरथस्तदा ॥ २७५ ॥
मुनिन्द्रौ तौ पुरस्कृत्य जगामाशु महायशाः ।
प्रभाते काल्यमुत्थाय चक्रे गोदानमुत्तमम् ॥ २७६ ॥
ऋषींस्तदा पुरस्कृत्य यज्ञवाटमुपागमत् ।
युक्ते मुहूर्ते विजये सर्वाभरणभूषितैः ॥ २७७ ॥
भ्रातृभिः सहितो रामः कृतकौतुकमङ्गलः ।
वसिष्ठं पुरतः कृत्वा महर्षीनपरानपि ॥ २७८ ॥

Digitized by Google

प्रपामध्ये तु विधिवद्वेदिं कृत्वा महातपाः ।
अग्निमाधाय वेद्यां तु विधिमन्त्रपुरस्कृतम् ॥ २७९ ॥
जुहावाग्नौ महातेजा वसिष्ठो भगवानृषिः ।
ततः सीतां समानीय सर्वाभरणभूषिताम् ॥ २८० ॥
समक्षमग्नेः संस्थाप्य राघवाभिमुखे तदा ।
अब्रवीज्जनको राजा कौसल्यानन्दवर्धनम् ॥ २८१ ॥
इयं सीता मम सुता सहधर्मचरी तव ।
प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना ॥ २८२ ॥
पतिव्रता महाभागा च्छायेवानुगता सदा ।
इत्युक्त्वा प्राक्षिपद्राजा मन्त्रपूतं जलं तदा ॥ २८३ ॥
एवं दत्त्वा तदा सीतां मन्त्रोदकपुरस्कृताम् ।
अब्रवीज्जनको राजा हर्षेणाभिपरिप्लुतः ॥ २८४ ॥
लक्ष्मणागच्छ भद्रं ते ऊर्मिलामुद्यतां मया ।
प्रतीच्छ पाणिं गृह्णीष्व मा भूत्कालस्य पर्ययः ॥ २८५ ॥
तमेवमुक्त्वा जनको भरतं चाभ्यभाषत ।
गृहाण पाणिं माण्डव्याः पाणिना रघुनन्दन ॥ २८६ ॥
शत्रुघ्नं चापि धर्मात्मा अब्रवीज्जनकेश्वरः ।
श्रुतकीर्त्या महाबाहो पाणिं गृह्णीष्व पाणिना ॥ २८७ ॥
जनकस्य वचः श्रुत्वा पाणीन् पाणिभिरस्पृशन् ।
चत्वारस्ते चतमृणां वसिष्ठस्य मते स्थिताः ॥ २८८ ॥

Digitized by Google

अग्निं प्रदक्षिणीकृत्य वेदिं राजानमेव च ।
ऋषींश्चैव महात्मानः सभार्या रघुसत्तमाः ॥ २८९ ॥
यथोक्तेन पथा चक्रुर्विवाहं विधिपूर्वकम् ।
त्रिरग्निं ते परिक्रम्य ऊहुर्भार्या महौजसः ॥ २९० ॥
अथोपकार्यां जग्मुस्ते सभार्या रघुनन्दनाः ।
अथ रात्र्यां व्यतीतायां विश्वामित्रो महामुनिः ॥ २९१ ॥
आपृष्ट्वा तौ च राजानौ जगामोत्तरपर्वतम् ।
विश्वामित्रे गते राजा वैदेहं मिथिलाधिपम् ॥ २९२ ॥
आपृष्ट्वाथ जगामाशु राजा दशरथः पुरीम् ।
अथ राजा विदेहानां ददौ कन्याधनं बहु ॥ २९३ ॥
दत्त्वा बहु धनं राजा समनुज्ञाप्य पार्थिवम् ।
प्रविवेश स्वनिलयं मिथिलां मिथिलेश्वरः ॥ २९४ ॥
राजाप्ययोध्याधिपतिः सह पुत्रैर्महात्मभिः ।
ऋषीन् सर्वान् पुरस्कृत्य जगाम सबलानुगः ॥ २९५ ॥
ददर्श भीमसंकाशं जटामण्डलधारिणम् ।
भार्गवं जामदग्न्यं तं राजराजविमर्दिनम् ॥ २९६ ॥
तं दृष्ट्वा भीमसंकाशं ज्वलन्तमिव पावकम् ।
ऋषयो राम रामेति वचो मधुरमब्रुवन् ॥ २९७ ॥
प्रतिगृह्य तु तां पूजामृषिदत्तां प्रतापवान् ।
रामं दाशरथिं रामो जामदग्न्योऽभ्यभाषत ॥ २९८ ॥

Digitized by Google

राम दाशरथे राम वीर्यं ते श्रूयतेऽद्भुतम् ।
धनुषो भेदनं चैव निखिलेन मया श्रुतम् ॥ २९९ ॥
तच्छ्रुत्वाहमनुप्राप्तो धनुर्गृह्य परं शुभम् ।
तदिदं घोरसंकाशं जामदग्न्यं महद्धनुः ॥ ३०० ॥
पूरयस्व शरेणैव स्वबलं दर्शयस्व च ।
श्रुत्वा तज्जामदग्न्यस्य वाक्यं दाशरथिस्तदा ॥ ३०१ ॥
अवजानासि मे तेजः पश्य मेऽद्य पराक्रमम् ।
इत्युक्त्वा राघवः क्रुद्धो भार्गवस्य शरासनम् ॥ ३०२ ॥
शरं च प्रतिजग्राह हस्ताल्लघुपराक्रमः ।
आरोप्य स धनू रामः शरं सज्ज्यं चकार ह ॥ ३०३ ॥
जामदग्न्यं ततो रामं रामः क्रुद्धोऽब्रवीद्वचः ।
ब्राह्मणोऽसीति पूज्यो मे विश्वामित्रकृतेन च ॥ ३०४ ॥
तस्माच्छक्तो न ते राम मोक्तुं प्राणहरं शरम् ।
इमां पादगतिं राम तपोबलसमार्जितान् ॥ ३०५ ॥
लोकानप्रतिमान् वा ते हनिष्यामि यदिच्छसि ।
तेजोऽभिहतवीर्यस्तु जामदग्न्यो जडीकृतः ॥ ३०६ ॥
रामं कमलपत्राक्षं मन्दं मन्दमुवाच ह ।
लोकास्त्वप्रतिमा राम निर्जितास्तपसा मया ॥ ३०७ ॥
जहि तान् शरमुख्येण मा भूत्कालस्य पर्ययः ।
तथा ब्रुवति रामे तु जामदग्न्ये प्रतापवान् ॥ ३०८ ॥

Digitized by Google

रामो दाशरथिः श्रीमांश्चिक्षेप शरमुत्तमम् ।
स हतान् दृश्य रामेण स्वान् लोकांस्तपसार्जितान् ॥ ३०९ ॥
जामदग्न्यो जगामाशु महेन्द्रं पर्वतोत्तमम् ।
गतो राम इति श्रुत्वा हृष्टः प्रमुदितो नृपः ॥ ३१० ॥
चोदयामास तां सेनां जगामाशु ततः पुरीम् ।
ननन्द सजनो राजा गृहे कामैः सुपूजितः ॥ ३११ ॥
कुमाराश्च महात्मानो वीर्येणाप्रतिमा भुवि ।
कृतदाराः कृतास्त्राश्च सधनाः ससुहृज्जनाः ॥ ३१२ ॥
शुश्रूषमाणाः पितरं वर्तयन्ति नरर्षभाः ।
रामस्तु सीतया सार्धं विजहार बहूनृतून् ॥ ३१३ ॥
प्रिया तु सीता रामस्य दाराः पितृकृता इति ।
गुणाद्रूपगुणाच्चापि प्रीतिर्भूयोऽभ्यवर्धत ॥ ३१४ ॥
तस्याश्च भर्ता द्विगुणं हृदये परिवर्तते ।
अन्तर्जातमपि व्यक्तमाख्याति हृदयं हृदा ॥ ३१५ ॥
तया स राजर्षिसुतोऽभिरामया
समेयिवानुत्तमराजकन्यया ।
अतीव रामः शुशुभेऽतिकामया
विभुः श्रिया विष्णुरिवामरेश्वरः ॥ ३१६ ॥

॥ इति श्रीरामायणसारे बालकाण्डः ॥

Digitized by Google

Digitized by Google

रामो दाशरथिः श्रीमांश्चिक्षेप शरमुत्तमम् ।
स हतान् [illegible]

Apply to :— M. LAKSHMANA SASTRI,
Senior Sanskrit Pundit,
St. Peter's College,
Tanjore.

Digitized by Google

The borrower must return this ...
the last date stamped below. If ano... places a recall for this item, the borrower wi... be notified of the need for an earlier return.

*Non-receipt of overdue notices does **not** exempt the borrower from overdue fines.*

Harvard College Widener Library
Cambridge, MA 02138 617-495-2413

WIDENER
UE 17 2002
FEB 10 2003
CANCELLED

Please handle with care.
Thank you for helping to preserve library collections at Harvard.

Digitized by Google

Digitized by Google